॥ श्रीः ॥

अमरकोशः ।

श्रीमदमरसिंहविरचितः ।

मुरादाबादवास्तव्यश्रीयुतगौडवंशावतंसभोला-
नाथात्मजपण्डितरामस्वरूपकृतभाषाटीकया शब्दानुक्रमणिकया च समेतः

सोऽयं

क्षेमराज-श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्)-यन्त्रालये

मुद्रयित्वा प्रकाशितः ।

संवत् १९८२, शके १८४७.

यह पुस्तक खेमराज श्रीकृष्णदासने बम्बई खेतवाडी ७ वीं गली खम्बाटा लेन निज "श्रीवेङ्कटेश्वर" स्टीम् प्रेसमें अपने लिये छापकर यहीं प्रकाशित किया।

निशाम्य दास मदनेर ...

AMARKOSHA

OF

AMARSINGH

WITH AN INDEX AND A COMMENTARY

BY

Ramaswarupa Bholanath Pandit,

Printed and Published

BY

KHEMRAJ SHRIKRISHNADASS

AT HIS

SHRI VENKATESHWAR STEAM PRESS

BOMBAY.

1925.

॥ श्रीः ॥

अमरकोशस्य अकारादिक्रमेण शब्दानुक्रमणिका ।

१-(प्राघूर्णिकः प्राघुणक-श्चाभ्युत्थान तु गौरवम् ।)

इत्यनुक्रमणिका ।



श्रीः ।

अथामरकोशः

भाषाटीकासमेतः ।

प्रथम काण्ड १.

अथ स्वर्गवर्गः १.

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः । सेव्यतामक्षयो धीराः स श्रिये चामृताय च ॥ १ ॥

यस्य भासा जगद्भाति सदैव सचराचरम् । तं नौमि परमात्मानं भक्तानामभयङ्करम् ॥ १ ॥ जटाटवीगलद्गंगचन्द्रचूडामणिं शिवम् । स्मृत्वामरकृतेः कुर्वे भाषां व्याख्यासुधानुगाम् ॥ २ ॥

अन्वयः—हे अनघाः! भवद्भिः,सः, अक्षयः,धीरः,श्रिये, च, अमृताय, च, सेव्यताम् ।ज्ञानदयासिन्धोः,अगाधस्य, अस्य,ई, अस्ति,गुणाः, च,सन्ति॥१॥

अर्थ—हे सज्जनो!तुम उस अविनाशी ज्ञानदाता गुरुकी भोग और मोक्षकी प्राप्ति होनेके अर्थ सेवा करो कि शास्त्रकरिके संपन्न और दयाकरिके पूर्ण तथा विषयोंसे विरक्त ऐसे इन गुरुके पास अखण्ड लक्ष्मी और सत्य, शौच, दया क्षमा आदिक गुण हैं ॥ १ ॥

ग्रंथमें वक्तव्य विषय दिखलाते हैं:—

समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः । सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥ २ ॥

अन्वयः—मया,अन्यतन्त्राणि,समाहृत्य,संक्षिप्तैः,प्रतिसंस्कृतैः,वर्गैः, युक्तम्, नामलिंगानुशासनं,सम्पूर्णम्, उच्यते।२

अर्थः—मैं व्याडि आदिकोंके नामलिङ्गानुशासन अथवा सिद्धांतोंका संग्रह करके शब्दोंके क्रमानुसार कथन करनेसे सुशोभित ऐसे थोडे २ शब्दोंके वर्गोंसे अर्थात् पृथक् २ प्रकरणोंसे युक्त ऐसा शब्द और उनके लिंगोंका स्पष्ट रीतिसे बोध करनेवाला कोश, परिपूर्ण रीतिसे कहता हूँ ॥ २ ॥

१ धियं राति ददाति । 'रा दाने' अस्मात् क्विप् । धीरा ज्ञानप्रदो गुरुरित्यर्थः भाषा—ज्ञानके देनेवाले गुरुको धीरा कहते हैं ।

इस ग्रंथमें लिंगादिव्यवस्था किस प्रकारसे की है वह कहते हैं:-

प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित्। स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥ ३ ॥

अन्वयः—अत्र, प्रायशः,रूपभेदेन, स्त्रीपुनपुंसकं, ज्ञेयम्; च,कुत्रचित्, साहचर्यात्, स्त्रीपुंनपुंसकं ज्ञेयम्; क्वचित्, तद्विशेषविधेः,स्त्रीपुंनपुंसकं,ज्ञेयम्॥ ३॥

अर्थ—इस ग्रंथमें बहुत करके ईप्' आप्, विसर्ग और अनुस्वार इनसे स्त्रीलिंग,पुंलिंग और नपुंसकलिंग जानना. जैसे—'पद्मालया' और 'पद्मा' यहां 'आप्' होनेसे 'पद्मालया' और 'पद्मा' यह स्त्रीलिङ्ग हैं'पिनाकोऽजगवं धनुः' यहां 'पिनाकः' यहांपर विसर्ग है इससे 'पिनाक' शब्द पुंलिंग है 'अजगवम्' यहांपर अनुस्वार होनेसे 'अजगव'शब्द नपुंसक है.कहींपर विशेषणमें स्थित अथवा सर्वनामवाचक शब्दमें स्थित रूपके भेदसे लिंगोंमें भेद होता है जैसा-'तत्परो हनुः'यहांपर'तत्परः'इस विशेषणका पुंलिंगरूप होनेसे उसका विशेष्यजो'हनु' शब्द है उसका भी पुंलिंगहीमें रूप चलता है तथा 'कुतूः कृत्तेः स्नेहपात्रं सैवाल्पा कुतुपः पुमान्'यहां 'सा' यह जो सर्वनामसंज्ञक शब्द है वह 'कुतू' शब्दका विशेषण है इससे'सा' इसका स्त्रीलिंग होनेसे उसका विशेष्य जो 'कुतू' शब्द है उसका भी स्त्रीलिंग है और निश्चित है लिंग जिसकाऐसा शब्द समीप उच्चारण करनेसे उसका जोलिं है वही लिंग उस समीप पढेहुए अनिश्चितलिंगवाले शब्दका जानना. जैसे 'अश्वयुगश्विनी' 'भानुःकरः' 'वियद्विष्णुपदम्'यहांपर'अश्वयुज्' 'भानु' और 'वियद्'इनअनिश्चितलिंगवाले शब्दोंके समीप निश्चित लिंगवाले 'अश्विनी' 'कर' और'विष्णुपद' ये शब्द होनेसे उनके जो लिंग हैं येही लिंग उन अनिश्चित लिंगवाले शब्दोके जानने अर्थात 'अश्वयुज्' शब्दका स्त्रीलिंग 'भानु'-'शब्दका पुंलिंग और वियद्' शब्दका नपुंसक लिंग है इस प्रकारसे जानने और कहीं कहींपर उन स्त्री, पुम्, नपुंक इनके विशेषरीतिसे कथन करनेसे स्त्रीलिंग, पुंलिंग और नपुंसकलिंग जानना. जैसे'भेरी स्त्री दुन्दुभिः पुमान्' रोचिः शोचिरुभे क्लीबे' यहां पर भेरी शब्दके समीप 'स्त्री' ऐसा विशेषरीतिसे कथन किया है इसवास्ते 'भेरी' यह शब्द स्त्रीलिंग है. और 'दुन्दुभि' शब्दके समीप 'पुमान्' यह

कथन करनेसे 'दुन्दुभि' शब्द पुंलिंग है और 'रोचिस्' 'शोचिस्' शब्दोंके समीप 'उभे क्लीबे' अर्थात् दोनों भी नपुंसक यह विशेष कथन करनेसे 'रोचिस्' और 'शोचिस्' ये शब्द नपुसकलिंग हैं इस प्रकारसे सर्वत्र जानना ॥ ३ ॥

भेदाख्यानाय न द्वन्द्वो नैकशेषो न संकरः । कृतोऽत्र भिन्नलिंगानामनुक्तानां क्रमादृते ॥ ४ ॥

अन्वयः—अत्र, अनुक्तानां, भिन्नलिंगानां, भेदाख्यानाय, द्वन्द्वः, न, कृतः; एकशेषः, न, कृतः; क्रमात्, ऋते, संकरः, न, कृतः ॥ ४ ॥

अर्थ—इस कोशमें अपने अपने पर्यायोंमें नहीं पडे हुए भिन्न २ लिंगवाले शब्दोंका लिंगभेद कहनेके अर्थ द्वन्द्व और एकशेष नहीं कियाहै जैसे-'देवता' शब्द स्त्रीलिंग है 'देवत' शब्द नपुसकलिंग है और 'अमर' शब्द पुँलिंग है इन भिन्नभिन्न लिंगवाले 'देवता' 'देवत' और 'अमर' शब्दोंका लिंगभेद कहनेके अर्थ 'देवतादैवतामराः' ऐसा द्वन्द्वसमास नहीं किया है. द्वन्द्वसमास किया जाय तो 'अमर' शब्दका पुंलिंग ही 'देवता' और 'दैवत' इनका होजायगा. कारण द्वन्द्व समासमें और तत्पुरुषमें परपदका ही लिंग होता है. वह यहांपर परपदलिंग जो 'अमर' शब्दका पुलिंग है सो 'देवता' और 'दैवत' शब्दका नहीं होनेके वास्ते द्वन्द्व समास नहीं किया ऐसा सर्वत्र जानना. वैसे ही 'नभःखंश्रावणो नभाः' यहांपर 'श्रावणौ तु नभसी' ऐसा 'नभसी' इसप्रकारका एकशेषभी नहीं किया, यदि 'नभाश्च नभश्च नभसी' ऐसा एकशेष करनेसे 'नभसी' यह नपुसकलिंग शेष रहेगा फिर आकाशवाचक 'नभस्' शब्द नपुसकलिंग होगा परन्तु श्रावणवाचक 'नभस्' शब्द पुंलिंग है ऐसा नहीं जाना जायगा, इस वास्ते 'ख नभः' और 'श्रावणो नभाः' ऐसा पृथक् २ 'नभस्' शब्द कहा है, लिंगभेद समझनेके लिये एकशेष 'नभसी' ऐसा नहीं किया, परन्तु समान लिंगोंका तो द्वन्द्वसमास किया ही है. जैसे-'स्वर्गनाकत्रिदिवत्रिदशालयाः' 'पादा रश्म्यङ्घ्रितुर्यांशाः' यहां पर एक लिंगकेही सब शब्द हैं इसवास्ते उनका द्वन्द्वसमास किया है और जिन शब्दोंके पर्यायशब्द और लिंग स्वतंत्रतासे अन्य स्थलोंमें कहे हैं, उससे अन्यत्र जो उस भिन्नलिंग शब्दोंका किसी अर्थान्तरके अर्थ कथन करनेके लिये द्वन्द्वसमास

किया है जैसे-'विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः' 'मातापितरौ पितरौ' यहांपर 'अप्सरस्'शब्द अपने पर्यायोंमें 'स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः' यहांही स्त्रीलिंग है ऐसा कहा है. उसी 'अप्सरस्'शब्दको देवयोनिमें परिगणनरूप अर्थके लिये विद्याधर आदिक गणोंमें पठित किया है और'विद्याधर' 'अप्सरस्''यक्ष''रक्षस्' 'गन्धर्व''किन्नर'इन सबशब्दोंका द्वन्द्वसमास किया है,अब यहांपर यद्यपि सबेशब्दोंका द्वन्द्वसमास होनेसे'विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः'ऐसा पुँलिंगरूप बना है तौ भी'अप्सरस्'शब्दका अन्यत्र 'स्त्रियां बहुष्वप्सरसः' यहांपर कथन करनेके अनुसार स्त्रीलिंग ही है ऐसा समझना और 'मातापितरौ पितरौ' यहांपर 'पितरौ' इसमें'मातृ'और 'पितृ' ऐसे दोनों शब्दोका एकवद्भाव किया गया है इसमें'मातृ' और'पितृ' इनमेंसे 'पितृ' इसका शेष रहा है, इनसे 'पितृ' इस शब्दको 'मातृ''पितृ' इन दोनोंका वाचकत्व होनेसेभी उसके अन्तर्गत यद्यपि 'मातृ' यह शब्द है तथापि वह 'मातृ' शब्द 'जनयित्री प्रसूर्माता' इस स्थलमें पर्यायशब्दोंके साथ स्त्रीलिंग पठित है इसवास्ते उस 'पितरौ'इसके अन्तर्गत 'मातृ'शब्दका स्त्रीलिंग ही है ऐसा जानना ।और इस कोशमें उन भिन्न भिन्न लिंगवाले शब्दोंका क्रम छोडके भिन्न२लिंगवाले शब्दोंमें संकर कहिये मिश्रण नहीं किया है. जैसे-'स्तवः स्तोत्रं स्तुतिर्नुतिः' यहांपर 'स्तव'ऐसा पुलिंग कहा फिर 'स्तोत्रं' यह नपुंसकलिंग कहा फिर 'स्तुतिः' 'नुतिः' वे स्त्रीलिंग शब्द कहे हैं.'स्तुतिःस्तोत्रःस्तवो नुतिः'ऐसा लिंगोंका मिश्रणरूप संकर नहीं किया है. ऐसाही'जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः'यहांपर 'जनुर्जननजन्मानि' ये नपुंसक शब्द कहे फिर 'जनिः' 'उत्पत्ति' ये स्त्रीलिंग शब्द कहे. फिर 'उद्भवः' यह पुंलिंग शब्द कहा इस प्रकारसे सर्वत्र लिंगविषयमें जानना॥४॥

त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति । निषिद्धलिंगं शेषार्थं त्वन्ताथादि न पूर्वभाक् ॥ ५ ॥

अन्वयः-त्रिलिङ्ग्याम्,त्रिषु,इति, पदम्, ज्ञेयम्; मिथुने, तु, द्वयोः, इति, पदम्, ज्ञेयम्; निषिद्धलिंगम्, शेषार्थम्,

ज्ञेयम्, त्वन्ताथादि, पूर्वभाक्, न, इति ज्ञेयम् ॥ ५ ॥

अर्थ—इस ग्रंथमें जहांपर कोई शब्द तीनों लिंगोमें चलता हो वह 'त्रिषु'ऐसा पद कथन किया है सो जानना जैसे—'त्रिषु स्फुलिङ्गोऽग्निकण:' यहांपर' स्फुलिङ्ग' शब्द तीनों लिङ्गोंमें चलता है इसवास्ते उस'स्फुलिङ्ग' शब्दके समीप 'त्रिषु' यह पद कथन किया है. और जहांपर स्त्रीलिङ्ग और पुंलिङ्ग इन दोनों लिंगोंमें कोई शब्द चलता हो तो वहां 'द्वयो:' एसा पद कथन किया है सो जानना. जैसे-'द्वयोर्ज्वालकीलौ' यहांपर 'ज्वाल' और 'कील' ये दोनों शब्द पुंलिंग और स्त्रीलिंग हैं इसवास्ते'द्वयो:' ऐसा कथन किया है 'द्वयो:' यह केवल द्विशब्दका उपलक्षण है,अर्थात किसी भी तरहसे द्वि–शब्दका जहांपर प्रयोग होगा वहां स्त्रीलिंग और पुंलिंग जानना. जैसे-'द्विहीनं प्रसवे सर्वम्'और 'द्वयहीने कुकुन्दरे' इत्यादिक स्थलमें द्वि शब्दसे स्त्रीलिंग और पुंलिग ऐसा अर्थ करनेसे प्रसव–वाचक जितने शब्द हैं वे सर्व स्त्रीलिंग और पुंलिगसे रहित हैं अर्थात् नपुंसकलिंग हैं और कुकुन्दर-शब्द द्वय-कहिये स्त्रीलिङ्ग और पुंलिंग इनसे रहित है अर्थात् नपुंसकलिंग है ऐसा जानना. तथा जिस शब्दका जो लिंग निषिद्ध किया हो उसके अतिरिक्त बाकी रहा लिंग उस शब्दका जानना. जैसे'वज्रमस्त्री'यहांपर'वज्र'यह शब्द'अस्त्री'कहिये स्त्रीलिंगनहीं है ऐसा इस'वज्र' शब्दको स्त्रीलिंगत्वका निषेध होनेपर बाकी रहेपुलिङ्ग और नपुसकलिंग इस'वज्र' शब्दके हैं ऐसा जानना और जहां जिस शब्के पीछे'तु' यह शब्द होवे तहां उसतुशब्दके प्रथम जो शब्द होवेउसका पर्यायवाचक शब्द केवल उस तुशब्दके पीछे पढा हुआ ही शब्द होता है उसे पहला शब्द उस 'तु'के पहले पठित किये शब्दका पर्यायवाचक शब्द नहीं होता है. जैसे—'नगरी त्वमरावती' यहांपर 'तु' यह जो शब्द पठन किया है इसके पूर्व पठित जो'नगरी'शब्द है उसका पर्यायअर्थबोधक शब्द'अमरावती' यह है इस तु–शब्दके कथन करनेसे 'नगरी' इसका संबंध 'अमरावती'इसमें होताहै उस'नगरी'शब्दके प्रथम पठित'इन्द्राणी'शब्दमें नहीं होता है यह'तु'अन्त में जिसके है ऐसे नामपदकी व्यवस्था कहीअबइसीहीप्रकारसे'तु'जिसकेअन्तमें

है ऐसा लिंगवाचक पद सर्वनामसंज्ञक पद और अव्ययसंज्ञक पद इन पदों- का भी संबंध उस तु-शब्दके पीछे पढे हुए शब्दमें ही होताहै जैसे पुंसि 'त्वन्त- र्धिः' यहां'पुंसि'इस लिंगवाचक पदका 'अन्तर्धिः' इस पदमें संबंध हुआ और 'तस्य तु प्रिया' यहां 'तस्य' इस सर्व- नामसंज्ञक पदका तु-शब्दके पीछे पठित प्रिया-शब्दमें संबंध हुआ और 'वा तु पुंसि' यहांपर 'वा' इस अव्ययसंज्ञक पदका तु-शब्दके पीछे पठित 'पुंसि' इसमें संबंध हुआ. इस प्रकारसे सर्वत्र तु-शब्दके विषयमें जानना, और इस कोशमें जहांपर जिन शब्दोंके प्रथम 'अथ' यह शब्द होवे वहां उस अथ शब्दके पीछे पठित नामपद, लिंगपद, सर्वनामपद, और अव्ययपद इनका संबंध उस अथके प्रथम पठित शब्दोंमें नहीं होता है तो उन अथ-शब्दके पीछे पठित शब्दोंका सम्बन्ध अथ- शब्दके पीछे पठित शब्दोंमें ही होताहै जैसे-'जवोऽथ शीघ्र त्वरितम्'यहांपर अथ-शब्दके पीछे पठित 'शीघ्र' इस नामपदका सम्बन्ध उस अथ-के प्रथम पठित जव-शब्दमें नहीं होता है किंतु अथ-शब्दके पीछे पठित 'शीघ्र' इस नामपदका संबंध उस अथ-शब्दके पीछे पठित 'त्वरितम्' 'लघु' 'क्षिप्रम्' 'अरम्' 'द्रुतम्' इन शब्दोंमें होता है ऐसेही-'शस्तं चाथ त्रिषु द्रव्ये'यहांपर अथ-शब्दके पीछे पठित 'त्रिषु' इस लिंगवाचक पदका द्रव्यवाचक पाप, पुण्य,सुख आदिक पदोंमें संबंध होता है. उस अथ-क प्रथम पठित 'शस्त' इसमें संबंध नहीं होता है. अब जहां अथ-शब्दके बदलेमें कहीं कहीं अथो- शब्द कहा होय वहां भीइसी ही प्रकार- की व्यवस्था जाननी जैसे-'अनुक्रोशो- ऽप्यथो हसः'यहांपर अथो इस शब्दके पीछे पठित 'हस' इस नामपदका संबंध उनके पीछे पठित 'हास' 'हास्य' इन शब्दोंमें होता है. उस अथो-शब्दके प्रथम पठित अनुक्रोश- शब्दमें नहीं होता है इस प्रकारसे व्यवस्था इस कोशमें करी है सो जिज्ञासु जनोंने जाननी ॥ ९ ॥

इति परिभाषा ।

स्वरव्ययं स्वर्गनाकत्रिदिवत्रिद- शालयाः । सुरलोको द्योदिवौ द्वे स्त्रि- यां क्लीबे त्रिविष्टपम् ॥ ६ ॥

स्वर्गके नाम ९—स्वर् १ स्वर्ग २ नाक ३ त्रिदिव ४ त्रिदशालय ५ सुरलोक ६ द्यो ७ दिव् ८ त्रिविष्टप ९ ॥ ६ ॥

अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः। सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥ ७ ॥ आदितेया दिविषदो लेखा अदितिनन्दनाः। आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥ ८ ॥ बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः। वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् ॥ ९ ॥

देवताओंके नाम २६—अमर १ निर्जर २ देव ३ त्रिदश ४ विबुध ५ सुर ६ सुपर्वन् ७ सुमनस् ८ त्रिदिवेश ९ दिवौकस् १० ॥ ७ ॥ आदितेय ११ दिविषद् १२ लेख १३ अदितिनन्दन १४ आदित्य १५ ऋभु १६ अस्वप्न १७ अमर्त्य १८ अमृतान्धस् १९ ॥ ८ ॥ बर्हिर्मुख २० क्रतुभुज् २१ गीर्वाण २२ दानवारि २३ वृंदारक २४ दैवत २५ देवता २६ ॥ ९ ॥

आदित्यविश्ववसवस्तुषिताभास्वरानिलाः। महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ॥ १० ॥

गणदेवताओंके नाम ९—आदित्य (बारह) १ विश्व (तेरह) २ वसु (आठ) ३ तुषित (छत्तिस) ४ आभास्वर (चौंसठ) ५ अनिल (उनचास) ६ महाराजिक (दोसौ बीस) ७ साध्य (बारह) ८ रुद्र (ग्यारह) ९ ॥ १० ॥

विद्याधराप्सरोयक्षरक्षोगन्धर्वकिंनराः। पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः ॥ ११ ॥

देवताओंकी जातिके भेद १०—विद्याधर १ अप्सरस् २ यक्ष ३ रक्षस् ४ गंधर्व ५ किन्नर ६ पिशाच ७ गुह्यक ८ सिद्ध ९ भूत १० ॥ ११ ॥

असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः। शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ॥ १२ ॥

दैत्योंके नाम १०—असुर १ दैत्य २ दैतेय ३ दनुज ४ इन्द्रारि ५ दानव ६ शुक्रशिष्य ७ दितिसुत ८ पूर्वदेव ९ सुरद्विष् १० ॥ १२ ॥

सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः । समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः ॥ १३ ॥ षडभिज्ञो दशबलोऽद्वयवादी विनायकः । मुनीन्द्रः श्रीघनः शास्ता मुनिः—

बुद्धके नाम १८—सर्वज्ञ १ सुगत २ बुद्ध ३ धर्मराज ४ तथागत ५ समन्तभद्र ६ भगवत् ७ मारजित् ८ लोकजित् ९ जिन १० ॥ १३ ॥ षडभिज्ञ ११ दशबल १२ अद्वयवादिन् १३ विनायक १४ मुनीन्द्र १५ श्रीघन १६ शास्तृ १७ मुनि १८ ॥

—शाक्यमुनिस्तु यः ॥ १४ ॥ स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः । गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः ॥ १५ ॥

शाक्यसिंहके नाम ७—शाक्यमुनि १ ॥ १४॥ शाक्यसिंह २ सर्वार्थसिद्ध ३ शौद्धोदनि ४ गौतम ५ अर्कबन्धु ६ मायादेवीसुत ७ ॥ १५ ॥

ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः । हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः ॥ १६ ॥ धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः । स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्विधिः ॥ १७ ॥

ब्रह्माजीके नाम २०—ब्रह्मन् १ आत्मभू २ सुरज्येष्ठ ३ परमेष्ठिन् ४ पितामह ५ हिरण्यगर्भ ६ लोकेश ७ स्वयम्भू ८ चतुरानन ९ ॥ १६ ॥ धातृ १० अब्जयोनि ११ द्रुहिण १२ विरिञ्चि १३ कमलासन १४ स्रष्टृ १५ प्रजापति १६ वेधस् १७ विधातृ १८ विश्वसृज् १९ विधि २० ॥ १७॥

विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः । दामोदरो हृषीकेशः केशवो माधवः स्वभूः ॥ १८ ॥ दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः । पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः॥१९॥ उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः। पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः ॥ २० ॥ देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः । वनमाली बलिध्वंसी कंसारातिरधोक्षजः ॥ २१ ॥ विश्वम्भरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः ।

विष्णुभगवान्के नाम३९—विष्णु १ नारायण २ कृष्ण ३ वैकुण्ठ ४ विष्टरश्रवस् ५ दामोदर ६ हृषीकेश ७ केशव ८ माधव ९ स्वभू १० ॥ १८ ॥ दैत्यारि ११

पुण्डरीकाक्ष ११गोविन्द १ ३गरुडध्वज १४ पीतांबर १५अच्युत १६शार्ङ्गिन् १७ विष्वक्सेन १८जनार्दन १९॥ १९॥ उपेन्द्र २०इन्द्रावरज २१चक्रपाणि २२ चतुर्भुज २३पद्मनाभ २४ मधुरिपु २५ वासुदेव २६ त्रिविक्रम २७॥ २० ॥ देवकीनन्दन २८शौरि २९श्रीपति ३० पुरुषोत्तम ३१वनमालिन् ३२ बलिध्वंसिन् ३३ कंसाराति ३४ अधोक्षज ३५ ॥२१॥ विश्वंभर ३६ कैटभजित् ३७ विधु ३८ श्रीवत्सलाञ्छन ३९ ॥

वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः ॥ २२ ॥

वसुदेवजीके नाम २—वसुदेव १ आनकदुन्दुभि २ ॥ २२ ॥

बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः । रेवतीरमणो रामः कामपालो हलायुधः ॥ २३ ॥ नीलांबरो रौहिणेयस्तालांको मुसली हली । संकर्षणः सीरपाणिः कालिन्दीभेदनो बलः ॥ २४ ॥

बलदेवजीके नाम १७—बलभद्र १ प्रलम्बघ्न २ बलदेव ३ अच्युताग्रज ४ रेवतीरमण ५ राम ६ कामपाल ७ हलायुध ८॥ २३ ॥ नीलांबर ९ रौहिणेय १०तालांक ११मुसलिन् १२ हलिन् १३संकर्षण १४ सीरपाणि १५ कालिन्दीभेदन १६ बल १७ ॥२४॥

मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः । कन्दर्पो दर्पकोऽनगः कामः पञ्चशरः स्मरः ॥ २५ ॥ शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः। पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ॥२६॥ ब्रह्मसूर्ऋष्यकेतुः-

कामदेवके नाम २१—मदन १ मन्मथ २ मार ३ प्रद्युम्न ४ मीनकेतन ५ कन्दर्प ६ दर्पक ७ अनंग ८ काम ९पञ्चशर १० स्मर ११ ॥ २५ ॥ शम्बरारि १२ मनसिज १३ कुसुमेषु १४ अनन्यज १५ पुष्पधन्वन् १६ रतिपति १७ मकरध्वज १८ आत्मभू १९ ॥ २६ ॥ ब्रह्मसू २० ऋष्यकेतु २१

—स्यादनिरुद्ध उषापतिः ।

अनिरुद्धके नाम २—अनिरुद्ध १ उषापति २ ॥

लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ॥ २७ ॥

लक्ष्मीजीके नाम ६—लक्ष्मी १ पद्मालया २ पद्मा ३ कमला ४ श्री ५ हरिप्रिया ६ ॥ २७ ॥

शंखो लक्ष्मीपतेः पाञ्चजन्य–

विष्णुभगवान्के शंखका नाम १–पाञ्चजन्य १ ॥

–श्चक्रं सुदर्शनम् ।

विष्णुभगवान्के चक्रका नाम १–सुदर्शन १ ॥

कौमोदकी गदा–

विष्णुभगवान्की गदाका नाम १–कौमोदकी १ ॥

–खड्गो नन्दकः–

विष्णुके खड्गका नाम १–नन्दक १॥

–कौस्तुभो मणिः ॥ २८ ॥

विष्णुकी मणिका नाम १–कौस्तुभ १ ॥ २८ ॥

गरुत्मान्गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः । नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ॥ २९ ॥

गरुडजीके नाम ९–गरुत्मत् १ गरुड २ तार्क्ष्य ३ वैनतेय ४ खगेश्वर ५ नागान्तक ६ विष्णुरथ ७ सुपर्ण ८ पन्नगाशन ९॥ २९ ॥

शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः । ईश्वरः शर्व ईशानः शङ्करश्चन्द्रशेखरः ॥ ३० ॥ भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः । मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः ॥ ३१ ॥ उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत् । वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ॥ ३२ ॥ कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः । हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ॥ ३३ ॥ गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ॥ व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः ॥ ३४ ॥

शिवजीके नाम ४८–शम्भु १ ईश २ पशुपति ३ शिव ४ शूलिन् ५ महेश्वर ६ ईश्वर ७ शर्व ८ ईशान ९ शंकर १० चन्द्रशेखर ११ ॥ ३० ॥ भूतेश १२ खण्डपरशु १३ गिरीश १४ गिरिश १५ मृड १६ मृत्युञ्जय १७ कृत्तिवासस् १८ पिनाकिन् १९ प्रमथाधिप २० ॥ ३१ ॥ उग्र २१ कपर्दिन् २२ श्रीकण्ठ २३ शितिकण्ठ २४ कपालभृत् २५ वामदेव २६ महादेव २७ विरूपाक्ष २८ त्रिलोचन २९ ॥ ३२ ॥ कृशानुरेतस् ३० सर्वज्ञ ३१ धूर्जटि ३२ नीललोहित ३३ हर ३४ स्मरहर ३५ भर्ग ३६ त्र्यम्बक ३७ त्रिपुरान्तक ३८ ॥ ३३ ॥ गंगाधर ३९

अन्धकरिपु ४० क्रतुध्वंसिन् ४१ वृषध्वज ४२ व्योमकेश ४३ भव ४४ भीम ४५ स्थाणु ४६ रुद्र ४७ उमापति ४८ ॥ ३४ ॥

कपर्दोऽस्य जटाजूटः—

शिवजीके जटाजूटका नाम १- कपर्द १ ॥

—पिनाकोऽजगवं धनुः ।

शिवजीके धनुषके नाम २—पिनाक १ अजगव २ ॥

प्रमथाः स्युः पारिषदा—

शिवजीके-पार्षदोंके नाम २—प्रमथ १ पारिषद २ ॥

ब्राह्मीत्याद्यास्तु मातरः ॥ ३५॥

"ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा । वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः ॥"

ब्राह्मी आदि शक्तियोंके नाम— ब्राह्मी १ माहेश्वरी२ कौमारी३ वैष्णवी ४ वाराही ५ इन्द्राणी ६ चामुण्डा ७ ॥ ३५ ॥

विभूतिर्भूतिरैश्वर्य—

ऐश्वर्यके नाम ३—विभूति १ भूति २ ऐश्वर्य ३ ॥

—मणिमादिकमष्टधा ।

"अणिमा महिमा चैव गरिमा लघिमा तथा । प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः॥"

ऐश्वर्यके भेद ८—अणिमन् १ महिमन् २ गरिमन् ३ लघिमन् ४ प्राप्ति ५ प्राकाम्य ६ ईशित्व ७ वशित्व ८ ॥

उमा कात्यायनी गौरी काली हैमवतीश्वरी ॥ ३६ ॥ शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला । अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका ॥ ३७ ॥

"आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा ॥"

पार्वतीके नाम २१—उमा १ कात्यायनी २ गौरी ३ काली ४ हैमवती ५ ईश्वरी ६ ॥ ३६ ॥ शिवा ७ भवानी ८ रुद्राणी ९ शर्वाणी १० सर्वमंगला ११ अपर्णा १२ पार्वती १३ दुर्गा १४ मृडानी १५ चण्डिका १६ अम्बिका १७ ॥ ३७ ॥ आर्या १८ दाक्षायणी १९ गिरिजा २० मेनकात्मजा २१ ॥

विनायको विघ्नराजद्वैमातुरगणाधिपाः । अप्येकदन्तहेरम्बलम्बोदरगजाननाः ॥ ३८ ॥

गणेशके नाम ८—विनायक १ विघ्नराज २ द्वैमातुर ३ गणाधिप ४ एकदन्त ५ हेरम्ब ६ लम्बोदर ७ गजानन ८ ॥ ३८ ॥

कार्त्तिकेयो महासेनः शरजन्मा षडाननः । पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ॥ ३९ ॥ बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः । षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ॥ ४० ॥

स्वामिकार्त्तिकेयके नाम १७– कार्त्तिकेय १ महासेन २ शरजन्मन् ३ षडानन ४ पार्वतीनन्दन ५ स्कन्द ६ सेनानी ७ अग्निभू ८ गुह ९॥३९॥ बाहुलेय १० तारकजित् ११ विशाख १२ शिखिवाहन १३ षाण्मातुर १४ शक्तिधर १५ कुमार १६ क्रौञ्चदारण १७ ॥ ४० ॥

इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः । वृद्धश्रवाः शुनासीरः पुरुहूतः पुरंदरः॥४१॥जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः । सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा ॥ ४२ ॥ वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः । जम्भभेदी हरिहयःस्वाराण्नमुचिसूदनः॥४३॥संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः। आखण्डलः सहस्राक्ष ऋभुक्षा--

इन्द्रके नाम ३५–इन्द्र १मरुत्वत २ मघवन् ३ बिडौजस् ४ पाकशासन ५ वृद्धश्रवस् ६ शुनासीर ७ पुरुहूत ८ पुरन्दर ९ ॥ ४१ ॥ जिष्णु १० लेखर्षभ ११ शक्र १२ शतमन्यु १३ दिवस्पति १४ सुत्रामन् १५गोत्रभिद् १६ वज्रिन् १७ वासव १८वृत्रहन् १९ वृषन् २० ॥ ४२ ॥ वास्तोष्पति २१ सुरपति२२ बलाराति २३ शचीपति २४ जम्भभेदिन् २५हरिहय२६ स्वाराज् २७ नमुचिसूदन२८॥४३॥ संक्रन्दन २९ दुश्च्यवन ३० तुरासाह् ३१ मेघवाहन ३२ आखण्डल ३३ सहस्राक्ष ३४ ऋभुक्षिन् ३५ ॥

--स्तस्य तु प्रिया ॥ ४४ ॥ पुलोमजा शचीन्द्राणी–

इन्द्राणीके नाम ३–॥ ४४ ॥ पुलोमजा १ शची २ इन्द्राणी ३ ॥

–नगरी त्वमरावती ।

इन्द्रपुरीका नाम १--अमरावती १॥

हय उच्चैःश्रवाः–

इन्द्रके घोडेका नाम १-उचैःश्रवस् १ ॥

–सूतो मातलि–

इन्द्रके सारथिका नाम १–मातलि १ ॥

–र्नन्दनं वनम् ॥ ४५ ॥

इन्द्रके बगीचेका नाम १--नन्दन १ ॥ ४५ ॥

स्यात्प्रासादो वैजयन्तो–

इन्द्रके घरहरेका नाम १–वैजयन्त १ ॥

–जयन्तः पाकशासनिः ।

इन्द्रके पुत्रके नाम २–जयन्त १ पाकशासनि २ ॥

ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः ॥ ४६ ॥

इन्द्रके हाथीके नाम ४–ऐरावत १ अभ्रमातंग १ ऐरावण ३ अभ्रमुवल्लभ ४ ॥ ४६ ॥

ह्रादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः । शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः ॥ ४७ ॥

वज्रके नाम १०–ह्रादिनी १ वज्र २ कुलिश ३ भिदुर ४ पवि ५ शतकोटि ६ स्वरु ७ शम्ब ८ दम्भोलि९ अशनि १० ॥ ४७ ॥

व्योमयानं विमानोऽस्त्री–

विमानके नाम२–व्योमयान १ विमान २ ॥

–नारदाद्याः सुरर्षयः ।

सुरर्षियोंके नाम–नारद आदि ॥

स्यात्सुधर्मा देवसभा–

देवसभाके नाम २ – सुधर्मा १ देवसभा २ ॥

–पीयूषममृतं सुधा ॥ ४८ ॥

अमृतके नाम ३–पीयूष १ अमृत २ सुधा ३ ॥ ४८ ॥

मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका ।

स्वर्गगंगाके नाम ४–मन्दाकिनी१ वियद्गंगा २ स्वर्णदी ३ सुरदीर्घिका४॥

मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ॥ ४९ ॥

सुमेरुपर्वतके नाम५–मेरु१सुमेरु२ हेमाद्रि३रत्नसानु४सुरालय ५ ॥४९॥

पञ्चैते देवतरवो मन्दारः पारिजातकः । संतानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥ ५० ॥

देववृक्षोंके नाम ५–मन्दार १ पारिजातक २ सन्तान ३ कल्पवृक्ष४ हरिचन्दन ५ ॥ ५० ॥

सनत्कुमारो वैधात्रः–

सनत्कुमारके नाम २–सनत्कुमार १ वैधात्र २ ॥

–स्वर्वैद्यावश्विनीसुतौ । नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ॥ ५१ ॥

अश्विनीकुमारके नाम ६–स्वर्वैद्य १ अश्विनीसुत २ नासत्य ३ अश्विन् ४ दस्र ५ आश्विनेय ६ ॥ ५१ ॥

स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः ।

अप्सराओंके नाम २–अप्सरस १ स्वर्वेश्या २ ॥ वे उर्वशी आदिक अप्सरायें हैं ॥

हाहाहूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम् ॥ ५२ ॥

गन्धर्वोंके नाम २–हाहा १ हूहू २ आदि देवोंके गवैये हैं ॥ ५२ ॥

अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः । कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात् ॥ ५३ ॥ बर्हिःशुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः । आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः ॥ ५४ ॥ लोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः । हिरण्यरेता हुतभुग्दहनो हव्यवाहनः ॥ ५५ ॥ सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः। शुचिरप्पित्त–

अग्निके नाम ३४–अग्नि १ वैश्वानर २ वह्नि ३ वीतिहोत्र ४ धनञ्जय ५ कृपीटयोनि ६ ज्वलन ७ जातवेदस् ८ तनूनपात् ९ ॥ ५३ ॥ बर्हिः–शुष्मन् ११ कृष्णवर्त्मन् १२ शोचिष्केश १३ उषर्बुध १४ आश्रयाश १५ बृहद्भानु १६ कृशानु १७ पावक १८ अनल १९ ॥ ५४ ॥ लो (लो) हिताश्व २० वायुसख २१ शिखावत् २२ आशुशुक्षणि २३ हिरण्यरेतस् २४ हुतभुज् २५ दहन २६ हव्यवाहन २७ ॥ ५५ ॥ सप्तार्चिस् २८ दमुनस् २९ शुक्र ३० चित्रभानु ३१ विभावसु ३२ शुचि ३३ अप्पित्त ३४.

–मौर्वस्तु वाडवो वडवानलः ५६

वडवानलके नाम ३–और्व १ वाडव २ वडवानल ३ ॥ ५६ ॥

वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम् ।

अग्निकी ज्वालाके नाम ५–ज्वाल १ कील २ अर्चिस् ३ हेति ४ शिखा ५ ॥

त्रिषु स्फुलिङ्गोऽग्निकणः–

चिनगारीके नाम २–स्फुलिंग १ अग्निकण २ ॥

–संतापः संज्वरः समौ ॥५७॥

संतापके नाम २–सन्ताप १ सञ्ज्वर २ ॥ ५७ ॥

धर्मराजः पितृपतिः समवर्ती परेतराट् । कृतान्तो यमुनाभ्राता शमनो यमराड्यमः ॥ ५८ ॥ कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः ।

यमराजके नाम १४—धर्मराज १ पितृपति २ समवर्तिन् ३ परेतराज् ४ कृतान्त ५ यमुनाभ्रातृ ६ शमन ७ यमराज् ८ यम ९॥५८॥ काल १० दण्डधर ११ श्राद्धदेव १२ वैवस्वत १३ अन्तक १४ ॥

राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशरः ॥ ५९ ॥ रात्रिचरो रात्रिचरः कर्बुरो निकषात्मजः । यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी ॥ ६० ॥

राक्षसोंके नाम १५—राक्षस १ कौणप २ क्रव्याद् ३ क्रव्याद ४ अस्रप ५ आशर ६॥५९॥रात्रिञ्चर ७ रात्रिचर ८ कर्बुर ९ निकषात्मज १० यातुधान ११ पुण्यजन १२ नैर्ऋत १३ यातु १४ रक्षस् १५ ॥ ६० ॥

प्रचेता वरुणः पाशी यादसांपतिरप्पतिः ।

वरुणके नाम ५—प्रचेतस् १ वरुण २ पाशिन् ३ यादसाम्पति ४ अप्पति ५॥

श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ॥ ६१ ॥ पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः । समीरमारुतमरुज्जगत्प्राणसमीरणाः ॥ ६२ ॥ नभस्वद्वातपवनपवमानप्रभञ्जनाः ॥

वायुके नाम २०—श्वसन १ स्पर्शन २ वायु ३ मातरिश्वन् ४ सदागति ५॥६१॥ पृषदश्व ६ गन्धवह ७ गन्धवाह ८ अनिल ९ आशुग १० समीर ११ मारुत १२ मरुत् १३ जगत्प्राण १४ समीरण १५ ॥ ६२॥ नभस्वत् १६ वात १७ पवन १८ पवमान १९ प्रभञ्जन २० ॥

प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ॥ ६३ ॥

शरीरस्था इमे—

हृदयके वायुका नाम १—प्राण १॥

गुदाके वायुका नाम १—अपान १॥

नाभिके वायुका नाम १—समान १॥

कण्ठके वायुका नाम १—उदान १॥

सब शरीरमें फिरनेवाले वायुका नाम १—व्यान १ ॥ ६३ ॥

—रंहस्तरसी तु रयः स्यदः । जवो—

वेगके नाम ५—रंहस् १ तरस् २ रय ३ स्यद ४ जव ५ ॥

—ऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ॥ ६४ ॥ सत्वरं चपलं तूर्णमविलम्बितमाशु च ।

शीघ्रताके नाम ११-शीघ्र १ त्वरित २ लघु ३ क्षिप्र ४ अर ५ द्रुत ६ ॥ ६४ ॥ सत्वर ७ चपल ८ तूर्ण ९ अविलंबित १० आशु ११ ।

सततानारताश्रान्तसंततविरतानिशम् ॥ ६५ ॥ नित्यानवरताजस्रमप्य-

निरन्तरके नाम ९—सतत १ अनारत २ अश्रान्त ३ सन्तत ४ अविरत ५ अनिश ६ ॥६५॥ नित्य ७ अनवरत ८ अजस्र ॥ ९ ॥

—थातिशयो भरः ।

अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम् ॥ ६६ ॥ तीव्रैकान्तानितान्तानि गाढबाढदृढानि च ।

वारम्वारके नाम १४-अतिशय १ भर २ अतिवेल ३ भृश ४ अत्यर्थ ५ अतिमात्र ६ उद्गाढ ७ निर्भर ८॥६६॥ तीव्र ९ एकान्त १० नितान्त ११ गाढ १२ बाढ १३ दृढ १४ ॥

क्लीबे शीघ्राद्यसत्त्वे स्यात्त्रिष्वेषां सत्त्वगामि यत् ॥ ६७ ॥

अद्रव्यवाची शीघ्र आदि शब्द नपुंसक लिंगमें होते हैं और द्रव्यवाची तीनों लिंगोंमें होवे हैं ॥ ६७ ॥

कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः । मनुष्यधर्मा धनदो राजराजो धनाधिपः ॥ ६८ ॥ किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः । यक्षैकपिङ्गैलविलश्रीदपुण्यजनेश्वराः ॥ ६९ ॥

कुबेरके नाम १७—कुबेर १ त्र्यंबकसख २ यक्षराज् ३ गुह्यकेश्वर ४ मनुष्यधर्मन् ५ धनद ६ राजराज ७ धनाधिप ८॥६८॥ किन्नरेश ९ वैश्रवण १० पौलस्त्य ११ नरवाहन १२ यक्ष १३ एकपिंग १४ ऐलविल १५ श्रीद १६ पुण्यजनेश्वर १७ ॥ ६९ ॥

अस्योद्यानं चैत्ररथम्—

कुबेरके बगीचेका नाम १—चैत्ररथ॥

—पुत्रस्तु नलकूबरः ।

कुबेरके पुत्रका नाम १—नलकूबर १।

कैलासस्थान—

कुबेरके स्थानका नाम १—कैलास १ ।

—मलका पू—

कुबेरकी पुरीका नाम १--अलका १।

—विमानं तु पुष्पकम् ॥ ७० ॥

कुबेरके विमानका नाम १—पुष्पक १ ॥ ७० ॥

स्यात्किन्नरः किम्पुरुषस्तुरङ्गवदनो मयुः ।

किन्नरोंके नाम ४–किन्नर १ किम्पुरुष २ तुरंगवदन ३ मयु ४ ॥

निधिर्ना शेवधि–

खजानेके नाम २–निधि १ शेवधि २ ॥

–र्भेदाः पद्मशङ्खादयो निधेः॥७१॥

खजानेके भेद–पद्म, शङ्ख इत्यादि ॥ ७१ ॥

इति स्वर्गवर्गः ॥ १ ॥

अथ व्योमवर्गः २.

द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम् । नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ॥ १ ॥ वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी । विहायसोऽपि नाकोऽपि द्युरपि स्यात्तदव्ययम् ॥ २ ॥

आकाशके नाम १९–द्यो १ दिव् २ अभ्र ३ व्योमन् ४ पुष्कर ५ अम्बर ६ नभस् ७ अन्तरिक्ष ८ गगन ९ अनंत १० सुरवर्त्मन् ११ ख १२ ॥ १ ॥वियत् १३ विष्णुपद १४ आकाश १५ विहायस् १६ विहायस १७नाक १८ द्युस् १९ ॥ २ ॥

इति व्योमवर्गः ॥ २ ॥

अथ दिग्वर्गः ३.

दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः ।

दिशाओंके नाम ५–दिश् १ ककुभ् २ काष्ठा ३ आशा ४ हरित्५।

प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ॥ १ ॥ उत्तरा दिगुदीची स्याद्–

पूर्व दिशाका नाम १–प्राची १।
दक्षिण दिशाका नाम १–अवाची१।
पश्चिमदिशाका नाम १–प्रतीची१।१।
उत्तरदिशाका नाम १–उदीची १ ।

–दिश्यं तु त्रिषु दिग्भवे ।

दिशोत्पन्नवस्तुका नाम १–दिश्य १।

इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् ॥ २ ॥ कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ॥

पूर्व दिशाके स्वामीका नाम–इन्द्र १ । अग्निकोणके स्वामीका नाम–वह्नि १ । दक्षिणदिशाके स्वामीका नाम–यमराज १ । नैर्ऋत्य कोणके स्वामीका

१ पद्मोऽस्त्रियां महापद्मः शङ्खो मकरकच्छपौ । मुकुन्दकुंदनीलश्च खर्वश्च निधयो नव ॥ इति शब्दार्णवः ॥ भाषा–पद्म १ महापद्म २ शंख ३ मकर ४ कच्छप ५ मुकुन्द ६ कुन्द ७ नील ८ खर्व ९ यह नो खजानेके भेद हैं।

नाम–नैर्ऋत १। पश्चिमदिशाके स्वामीका नाम–वरुण १। वायुकोणके स्वामीका नाम–पवन १ ॥२॥ उत्तर दिशाके स्वामीका नाम–कुबेर १। ईशान कोणके स्वामीका नाम–ईश १॥

ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ॥ ३ ॥ पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ।

पूर्व दिशाके हस्तीका नाम–ऐरावत १। अग्निकोणके हस्तीका नाम–पुण्डरीक २। दक्षिण दिशाके हस्तीका नाम–वामन ३। नैर्ऋत कोणके हस्तीका नाम–कुमुद ४। पश्चिम दिशाके हस्तीका नाम–अञ्जन ५॥ ३ ॥ वायुकोणके हस्तीका नाम–पुष्पदन्त ६। उत्तरदिशाके हस्तीका नाम–सार्वभौम ७। ईशानकोणके हस्तीका नाम–सुप्रतीक ८।

करिण्योऽभ्रमुकपिलापिङ्गलानुपमाः क्रमात् ॥ ४ ॥ ताम्रकर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावती ।

ऊपर लिखे हुए ऐरावत आदि आठ हस्तियोंकी हथिनियोंके क्रमसे नाम–अभ्रमु १ कपिला २ पिंगला ३ अनुपमा ४ ॥ ४ ॥ ताम्रकर्णी ५ शुभ्रदन्ती ६ अंगना ७ अञ्जनावती ८।

क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम् ॥ ५ ॥

अग्नि आदि कोणके नाम २–अपदिश १ विदिश् २ ॥ ५ ॥

अभ्यन्तरं त्वन्तरालं–

बीचभागके नाम २–अभ्यंतर १ अन्तराल २।

–चक्रवालं तु मण्डलम् ।

गोलाकार समूहके नाम २–चक्रवाल १ मण्डल २।

अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः ॥ ६ ॥ धाराधरो जलधरस्तडित्वान्वारिदोऽम्बुभृत् । घनजीमूतमुदिरजलमुग्धूमयोनयः ॥७॥

बादलके नाम १५–अभ्र १ मेघ २ वारिवाह ३ स्तनयित्नु ४ बलाहक ५ ॥६॥ धाराधार ६ जलधर ७ तडित्वत् ८ वारिद ९ अम्बुभृत् १० घन ११ जीमूत १२ मुदिर १३ जलमुच् १४ धूमयोनि १५ ॥ ७ ॥

कादम्बिनी मेघमाला–

मेघपंक्तिके नाम २ कादम्बिनी १ मेघमाला २ ॥

–त्रिषु मेघभवेऽभ्रियम् ।

मेघोत्पन्न वस्तुका नाम १–अभ्रिय १।

स्तनितं गर्जितं मेघनिर्घोषो रसितादि च ॥ ८ ॥

गर्जनेके नाम ४—स्तनित १ गर्जित २ मेघनिर्घोष ३ रसित ४ ॥ ८ ॥

शम्पाशतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा । तडित्सौदामनी विद्युच्चञ्चला चपला अपि ॥ ९॥

बिजलीके नाम १०—शम्पा १ शतह्रदा २ ह्रादिनी ३ ऐरावती ४ क्षणप्रभा ५ तडित् ६ सौदामनी ७ विद्युत् ८ चञ्चला ९ चपला १० ॥९॥

स्फूर्जथुर्वज्रनिर्घोषो—

वज्रके शब्दोंके नाम २—स्फूर्जथु १ वज्रनिर्घोष २ ।

—मेघज्योतिरिरंमदः ।

वज्रके अग्निके नाम २—मेघज्योतिष् १ इरम्मद २ ।

इन्द्रायुधं शक्रधनुस्तदेव ऋजु रोहितम् ॥ १० ॥

इन्द्रधनुषके नाम ३—इन्द्रायुध १ शक्रधनुष् २ रोहित ३ । सरल इंद्रधनुषका नाम रोहित है ॥ १० ॥

वृष्टिर्वर्षं—

वर्षाके नाम २—वृष्टि १ वर्ष २ ।

—तद्विघातेऽवग्राहावग्रहौ समौ ।

झूराके नाम २—अवग्राह १ अवग्रह २॥

धारासंपात आसारः—

निरन्तर मेघधाराके नाम २—धारासम्पात १ आसार ॥ २ ॥

—शीकरोऽम्बुकणाः स्मृताः ॥ ११॥

वायुसे उडाये हुए जलकणों-(फुहारों)का नाम १ १शीकर १॥ ११॥

वर्षोपलस्तु करका—

आकाशसे गिरे हुए पत्थरोंके नाम २—वर्षोपल १ करका २ ॥

—मेघच्छन्नेऽह्नि दुर्दिनम् ।

मेघसे आच्छादित हुआ दिनरात्रिका नाम १—दुर्दिन ॥ १ ॥

अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम् ॥ १२ ॥ अपिधानतिरोधानपिधानाच्छादनानि च ।

ढपनाके नाम ८—अन्तर्धा १ व्यवधा २ अन्तर्धि ३ अपवारण ४॥ १२ ॥ अपिधान ५ तिरोधान ६ पिधान ७ आच्छादन ८ ॥

हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ॥ १३ ॥ विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः । अब्जो जैवातृकः सोमो ग्लौर्मृगांकः कलानिधिः ॥ १४ ॥

द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ।

चन्द्रमाके नाम २०—हिमांशु १ चन्द्रमस् २ चन्द्र ३ इन्दु ४ कुमुदबान्धव ५ ॥ १३ ॥ विधु ६ सुधांशु ७ शुभ्रांशु ८ ओषधीश ९ निशापति १० अब्ज ११ जैवातृक १२ सोम १३ ग्लौ १४ मृगाङ्क १५ कलानिधि १६ ॥ १४ ॥ द्विजराज १७ शशधर १८ नक्षत्रेश १९ क्षपाकर २० ॥

कला तु षोडशो भागो—

चन्द्रमाके $\frac{1}{16}$ वे भागका नाम १ - कला १ ॥

—बिम्बोऽस्त्री मण्डलं त्रिषु ॥१५॥

चन्द्रमण्डलके नाम २- बिम्ब १ मण्डल २ ॥ १५ ॥

भित्तं शकलखण्डे वा पुंस्यर्धो—

खण्डके नाम ४ - भित्त १ शकल २ खण्ड ३ अर्द्ध ४ (पुंलिंग) ॥

—ऽर्धं समेंऽशके ।

समभागका नाम १--अर्द्ध १ (नपुंसकलिंग) ॥

चन्द्रिका कौमुदी ज्योत्स्ना—

चांदनीके नाम ३ चन्द्रिका १ कौमुदी २ ज्योत्स्ना ३ ॥

—प्रसादस्तु प्रसन्नता ॥ १६ ॥

निर्मलताके नाम २—प्रसाद १ प्रसन्नता २ ॥ १६॥

कलंकाङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम् ।

चिह्नके नाम ६—कलंक १ अंक२ लाञ्छन ३ चिह्न४लक्ष्मन् ५लक्षण६॥

सुषमा परमा शोभा—

अतिशोभाका नाम १—सुषमा १।

—शोभा कान्तिर्द्युतिश्छविः ॥ १७॥

शोभाके नाम ४शोभा १-कान्ति २ द्युति ३ छवि ४ ॥ १७ ॥

अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् । प्रालेयं मिहिका चा-

पालेके नाम ७ अवश्याय १ नीहार २ तुषार ३ तुहिन ४ हिम ५ प्रालेय ६ मिहिका ७ ॥

—थ हिमानी हिमसंहतिः ॥ १८ ॥

पालेके समूहके नाम २--हिमानी १ हिमसंहति २ ॥ १८ ॥

शीतं गुणे—

शीतलताका नाम १—शीत १ ॥

—तद्वदर्थाः सुषीमः शिशिरो जडः । तुषारः शीतलः शीतो हिमः सप्तान्यालिंगकाः ॥ १९ ॥

शीतलवस्तुके नाम ७—सुषीम १ शिशिर २ जड ३ तुषार ४ शीतल ५ शीत ६ हिम ७ ॥ १९ ॥

ध्रुव औत्तानपादिः स्या—

ध्रुवजीके नाम २—ध्रुव १ औत्तानपादि २ ॥

—दगस्त्यः कुम्भसम्भवः । मैत्रावरुणि—

अगस्त्यके नाम ३—अगस्त्य १ कुम्भसम्भव २ मैत्रावरुणि ३ ॥

रस्यैव लोपामुद्रा सधर्मिणी २०

अगस्त्यकी स्त्रीका नाम १—लोपामुद्रा १ ॥ २० ॥

नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम् ।

नक्षत्रोंके नाम ६—नक्षत्र १ ऋक्ष २ भ ३ तार ४ तारका ५ उडु ६ ॥

दाक्षायण्योऽश्विनीत्यादितारा-

अश्विनी आदि २८ नक्षत्रोंका नाम १—दाक्षायणी १ ।

—अश्वयुगश्विनी ॥ २१ ॥

अश्विनी नक्षत्रके नाम २—अश्वयुज् १ अश्विनी २ । २१ ॥

राधा विशाखा—

विशाखानक्षत्रके नाम २—राधा १ विशाखा २ ॥

—पुष्ये तु सिध्यतिष्यौ—

पुष्यनक्षत्रके नाम ३—पुष्य १ सिध्य २ तिष्य ३ ॥

—श्रविष्ठया ।

समा धनिष्ठा—

धनिष्ठानक्षत्रके नाम २—श्रविष्ठा १ धनिष्ठा २ ॥

—स्युः प्रोष्ठपदा

भाद्रपदाः स्त्रियः ॥ २२ ॥

पूर्वभाद्रपदा और उत्तरभाद्रपदा नक्षत्रोंके नाम २—प्रोष्ठपदा १ भाद्रपदा २ ॥ २२ ॥

मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहायणी ।

मृगशिरनक्षत्रके नाम ३—मृगशीर्ष १ मृगशिर २ आग्रहायणी ३ ॥

इल्वलास्तच्छिरोदेशे तारका निवसन्ति याः ।

मृगशिरके मस्तकपर रहनेवाले नक्षत्रोंका नाम १—इल्वल १ ॥ २३ ॥

बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः । जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः ॥ २४ ॥

बृहस्पतिके नाम ९—बृहस्पति १ सुराचार्य २ गीष्पति ३ धिषण ४ गुरु ५ जीव६ आंगिरस७ वाचस्पति ८ चित्रशिखण्डिज ९ ॥ २४ ॥

शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः ।

शुक्रके नाम६—शुक्र १ दैत्यगुरु२ काव्य ३ उशनस् ४ भार्गव५कवि६॥

अंगारकः कुजो भौमो लोहितांगो महीसुतः ॥ २५ ॥

मंगलके नाम ५—अङ्गारक कुज २ भौम ३ लोहितांग ४ महीसुत ५॥ २५॥

रौहिणेयो बुधः सौम्यः—

बुधके नाम ३—रौहिणेय १ बुध २ सौम्य ३ ॥

—समौ सौरिशनैश्चरौ ।

शनिके नाम२—सौरि१ शनैश्चर२॥

तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः ॥ २६ ॥

राहुके नाम ५—तमस् १ राहु २ स्वर्भानु ३ सैंहिकेय ४ विधुन्तुद५॥२६॥

सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः[1] ।

मरीचि अत्रि आदि सप्तर्षियोंके नाम—चित्रशिखण्डिन् ॥ १ ॥

राशीनामुदयो लग्नं—

राशियोंके उदयका नाम १—लग्न१

—ते तु मेषवृषादयः ॥ २७ ॥

राशियोंके नाम—मेष १ वृष २ आदि ॥ २७ ॥

सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः । भास्कराहस्करब्रध्नप्रभाकरविभाकराः ॥ २८ ॥ भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः । विकर्तनार्कमार्त्तण्डमिहिरारुणपूषणः ॥ २९ ॥ द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः । विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः॥३०॥ भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ।

सूर्यके नाम ३७—सूर १ सूर्य २ अर्य्यमन् ३ आदित्य ४ द्वादशात्मन् ५ दिवाकर ६ भास्कर ७ अहस्कर ८ ब्रध्न ९प्रभाकर १०विभाकर

---

[1] मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः। वसिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखंडिनः ॥ १ ॥ भाषा—मरीचि १ अंगिरस २ अत्रि ३ पुलस्त्य ४ पुलह ५ क्रतु ६ वसिष्ठ ७ यह सप्तर्षि चित्रशिखण्डि कहलाते हैं ।

११ ॥ २८ ॥ भास्वत् १२ विवस्वत १३ सप्ताश्व १४ हरिदश्व १५ उष्णरश्मि १६ विकर्त्तन १७ अर्क १८ मार्तण्ड १९ मिहिर २० अरुण २१ पूषन् २२ ॥ २९ ॥ द्युमणि २३ तरणि २४ मित्र २५ चित्रभानु २६ विरोचन २७ विभावसु २८ ग्रहपति २९ त्विषाम्पति ३० अहर्पति ३१ ॥ ॥३०॥ भानु ३२ हंस ३३ सहस्रांशु ३४ तपन ३५ सवितृ ३६ रवि ३७

माठरः पिंगलो दण्डश्चण्डांशोः पारिपार्श्विकाः ॥ ३१ ॥

सूर्यपार्श्ववर्ती तीनोंके एक एक नाम -माठर १ पिंगल २ दण्ड ३ ॥ ३१ ॥

सूरसूतोऽरुणोऽनूरुः काश्यपिर्गरुडाग्रजः ।

सूर्यके सारथिके नाम ५--सूरसूत १ अरुण २ अनूरु ३ काश्यपि ४ गरुडाग्रज ५ ॥

परिवेषस्तु परिधिरुपसूर्यकमण्डले ॥ ३२ ॥

सूर्यके मण्डलके अर्थात् जो कभी२ उनके चारों ओर घेरासा बन जाता है उसके नाम ४--परिवेष १ परिधि २ उपसूर्यक ३ मण्डल ४ ॥ ३२ ॥

किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः । भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम् ॥ ३३ ॥

सूर्यकिरणके नाम ११--किरण १ उस्र २ मयूख ३ अंशु ४ गभस्ति ५ घृणि ६ रश्मि ७ भानु ८ कर ९ मरीचि १० दीधिति ११ ॥ ३३ ॥

स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः । रोचिः शोचिरुभे क्लीबे--

दीप्तिके नाम ११--प्रभा १ रुच् २ रुचि ३ त्विष् ४ भा ५ भास् ६ छवि ७ द्युति ८ दीप्ति ९ रोचिष् १० शोचिष् ११ ॥

--प्रकाशो द्योत आतपः ॥ ३४ ॥

धूपके नाम ३--प्रकाश १ द्योत २ आतप ३ ॥ ३४ ॥

कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति ।

थोडे गरमके नाम ४--कोष्ण १ कवोष्ण २ मन्दोष्ण ३ कदुष्ण ४ ॥

तिग्मं तीक्ष्णं खरं तद्--

बहुत गरमके नाम ३--तिग्म १ तीक्ष्ण २ खर ३ ॥

--मृगतृष्णा मरीचिका ॥ ३५ ॥

मृगतृष्णाके नाम २--मृगतृष्णा १ मरीचिका २ ॥ ३५ ॥

इति दिग्वर्गः ॥ ३ ॥

अथ कालवर्गः ४.

कालो दिष्टोऽप्यनेहापि समयो-

समयके नाम ४—काल १ दिष्ट २ अनेहस् ३ समय ४ ॥

—ऽथ पक्षतिः ।

प्रतिपद् द्वे इमे स्त्रीत्वे—

प्रतिपदाके नाम २--पक्षति १ प्रतिपत् २ ॥

--तदाद्यास्तिथयो द्वयोः ॥ १ ॥

प्रतिपदादिका नाम १- तिथि १ ॥१॥

घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ ।

दिनके नाम ५—घस्र १ दिन २ अहन् ३ दिवस ४ वासर ५ ॥

प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्युषसी अपि ॥ २ ॥

प्रभातं च—

प्रातःकालके नाम ६—प्रत्यूष १ अहर्मुख २ कल्य ३ उषस् ४ प्रत्युषस् ५ ॥ २ ॥ प्रभात ॥ ६ ॥

--दिनान्ते तु सायंसंध्या पितृप्रसूः ।

सायंकालके नाम ४—दिनान्त १ सायम् २ सन्ध्या ३ पितृप्रसू ॥३॥

प्राह्णापराह्णमध्याह्नास्त्रिसंध्य-

प्रातःकालका नाम १—प्राह्ण १ ॥ मध्याह्नकालका नाम १—मध्याह्न १ ॥ मध्याह्नोत्तर कालका नाम १—अपराह्ण १—इन तीनों कालोंका इकट्ठा नाम--त्रिसंध्य १ ॥

—मथ शर्वरी ॥ ३ ॥

निशा निशीथिनी रात्रिस्त्रियामा क्षणदाक्षपा । विभावरीतमस्विन्यौ रजनी यामिनी तमी ॥४॥

रात्रिके नाम १२—शर्वरी १—॥ ३ ॥ निशा २ निशीथिनी ३ रात्रि ४ त्रियामा ५ क्षणदा ६ क्षपा ७ विभावरी ८ तमस्विनी ९ रजनी १० यामिनी ११ तमी १२ ॥ ४ ॥

तमिस्रा तामसी रात्रि—

अन्धियारी रात्रिका नाम १—तमिस्रा १ ॥

—ज्यौत्स्नी चन्द्रिकयान्विता ।

उजयाली रात्रिका नाम १—ज्यौत्स्नी १ ।

आगामिवर्तमानाहर्युक्तायां निशि पक्षिणी ॥ ५ ॥

वर्तमान और आगन्तुक दिनोंके मध्यकी रात्रिका नाम १—पक्षिणी १।५

गणरात्रं निशा बह्व्यः—

बहुत रात्रियोंका नाम १—गणरात्र १॥

—प्रदोषो रजनीमुखम् ।

रात्रिके प्रथमभागके नाम २—प्रदोष १ रजनीमुख २ ॥

अर्धरात्रनिशीथौ द्वौ—

आधीरात्रिके नाम२—अर्धरात्र १ निशीथ २ ॥

—द्वौ यामप्रहरौ समौ॥ ६ ॥

प्रहरके नाम २ याम १प्रहर२॥६॥

स पर्वसंधिः प्रतिपत्पञ्चदश्योर्यदन्तरम् ॥

प्रतिपदा १और पंचदशी१५।३० के मध्यके कालका नाम१-पर्वसन्धि १॥

पक्षान्तौ पञ्चदश्यौ द्वे—

अमावास्या और पूर्णिमाका नाम १—पक्षान्त १ ॥

—पौर्णमासी तु पूर्णिमा ॥ ७ ॥

पूर्णिमाके नाम २—पौर्णमासी १ पूर्णिमा २ ॥ ७ ॥

कलाहीने सानुमतिः—

जिस पूर्णमासीमें प्रतिपदाके योगसे चन्द्रमाकी कला हीन हो उसका नाम १—अनुमति १ ॥

—पूर्णे राका निशाकरे ।

जिसमें पूर्ण चन्द्रमा हो उस पूर्णिमाका नाम १—राका १ ॥

अमावास्या त्वमावस्या दर्शः सूर्य्येन्दुसङ्गमः ॥ ८ ॥

अमावास्याके नाम ४—अमावास्या १ अमावस्या २ दर्श ३ सूर्येन्दुसंगम ४ ॥ ८ ॥

सा दृष्टेन्दुः सिनीवाली—

. जिसमें चतुर्दशीके योगसे चन्द्रमाका दर्शन होय उस अमावास्याका नाम १--सिनीवाली १ ॥

—सा नष्टेन्दुकला कुहूः ।

जिसमें बिलकुल चन्द्रदर्शन न होय उस अमावस्याका नाम १—कुहू १ ॥

उपरागो ग्रहो राहुग्रस्ते त्विन्दौ च पूष्णि च ॥ ९ ॥

सोपप्लवोपरक्तौ द्वा—

चन्द्रग्रहण और सूर्यग्रहणके नाम ४--उपराग १ ग्रह २ ॥ ९ ॥ सोपप्लव ३ उपरक्त ४ ।

—वग्न्युत्पात उपाहितः ।

धूम्रकेतुके नाम २—अग्न्युत्पात १ उपाहित २ ॥

एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ ॥ १० ॥

सूर्य और चन्द्र दोनोंका इकट्ठा नाम १—पुष्पवन्त १ ॥ १० ॥

अष्टादश निमेषास्तु काष्ठा—

पलक मारनेका नाम—निमेष १॥ अठारह निमेषोंका नाम १—काष्ठा१॥

—त्रिंशत्तु ताः कला ।

तीस काष्ठाओंका नाम १—कला १ ॥

तास्तु त्रिंशत्क्षण—

तीस कलाओंका नाम १—क्षण १ ।।

—स्ते तु मुहूर्ता द्वादशास्त्रियाम् ॥ ११

बारह क्षणोंका नाम १—मुहूर्त्त १ ।। ११ ॥

ते तु त्रिंशदहोरात्रः—

तीस मुहूर्त्तोंका नाम १—अहोरात्र १ ।।

—पक्षस्ते दशपञ्च च ।

पंद्रह दिनरातका नाम १—पक्ष १ ॥

पक्षौ पूर्वापरौ शुक्लकृष्णौ—

पक्ष दो हैं २—शुक्ल १ कृष्ण २ ॥

—मासस्तु तावुभौ ॥ १२ ॥

दो पक्षोंका नाम १—मास १ ।। १२ ।।

द्वौ द्वौ मार्गादिमासौ स्यादृतु-

मार्गशीर्षादि दो दो मासोंका नाम १—ऋतु १ ॥

—स्तैरयनं त्रिभिः ।

तीन ऋतुओंका नाम १—अयन १ ॥

अयने द्वे गतिरुदग्दक्षिणार्कस्य—

दो अयनोंके २ भेद—उत्तरायण १ दक्षिणायन २ ॥

—वत्सरः ॥ १३ ॥

दो अयनोंका नाम १—वत्सर १ ।। १३ ॥

समरात्रिन्दिवे काले विषुवद्वि-षुवं च तत् ।

जिसमें दिनरात समान होते हैं उस संक्रांति (तुला और मेष) के नाम २—विषुवत् १ विषु २ ॥

मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः ॥ १४ ॥

अगहन महीनेके नाम ४—मार्गशीर्ष १ सहम २ मार्ग ३ आग्रहायणिक ४ ॥ १४ ॥

पौषे तैषसहस्यौ द्वौ—

पूसमासके नाम ३ ।। पौष १ तैष २ सहस्य ३

—तपा माघेऽ—

माघमासके नाम २—तपस् १ माघ २ ।।

—थ फाल्गुने ।

स्यात्तपस्यः फाल्गुनिकः—

फाल्गुनमासके नाम ३—फाल्गुन १ तपस्य २ फाल्गुनिक ३ ॥

—स्याच्चैत्रे चैत्रिको मधुः ॥ १५ ॥

चैत्रमासके नाम ३—चैत्र १ चैत्रिक २ मधु ३ ॥ १५ ॥

वैशाखे माधवो राधो—

वैशाखमासके नाम ३—वैशाख १ माधव २ राध ३ ॥

—ज्येष्ठ शुक्र—

ज्येष्ठके नाम २—ज्येष्ठ १ शुक्र २॥

—श्शुचिस्त्वयम् ।

आषाढे-

आषाढमासके नाम २–शुचि १ आषाढ २ ॥

–श्रावणे तु स्यान्नभाः

श्रावणिकश्च सः ॥ १६ ॥

श्रावणमासके नाम ३–श्रावण १ नभस् २ श्रावणिक ३ ॥ १६ ॥

स्युर्नभस्यः प्रौष्ठपदभाद्रभाद्रपदाः समाः ।

भादों मासके नाम ४––नभस्य १ प्रौष्ठपद २ भाद्र ३ भाद्रपद ४ ॥

स्यादाश्विन इषोऽप्याश्वयुजोऽपि

क्वारमासके नाम ३–आश्विन १ इष २ आश्वयुज ३ ॥

–स्यात्तु कार्त्तिके ॥ १७ ॥

बाहुलोर्जौ कार्त्तिकिको–

कार्तिकमासके नाम ४ कार्तिक १ ॥ १७ ॥ बाहुल २ ऊर्ज ३ कार्तिकिक ४ ॥

हेमन्तः–

अगहनपूस माससे सिद्ध हुई ऋतुका नाम १–हेमन्त १ ॥

–शिशिरोऽस्त्रियाम् ।

माघ फाल्गुनसे सिद्ध हुई ऋतुका नाम १–शिशिर १ ॥

वसन्ते पुष्पसमयः सुरभि–

चैत्र बैशाखसे सिद्ध ऋतुके नाम ३–वसन्त १ पुष्पसमय २ सुरभि ३ ॥

–ग्रीष्म ऊष्मकः ॥ १८ ॥

निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः ।

ज्येष्ठआषाढके समयक ग्रीम ७–ग्रीष्म १ ऊष्मक २ ॥ १८ ॥ निदाघ ३ उष्णोपगम ४ उष्ण ५ ऊष्मागम ६ तप ७ ॥

स्त्रियां प्रावृट्स्त्रियां भूम्नि वर्षा

सावन भादोंके ऋतुके नाम २–प्रावृट् १ वर्षा २ ॥

–अथ शरत् स्त्रियाम ॥ १९ ॥

क्वार कार्तिकके समयका नाम १–शरद् १ ॥ १९ ॥

षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् ।

मार्गशीर्ष आदि दो २ महीनोंके ये छः ऋतु होते हैं ॥

संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः ॥ २० ॥

वर्षके नाम ६–संवत्सर १ वत्सर २ अब्द ३ हायन ४ शरद् ५ समा ६ ॥ २० ॥

मासेन स्यादहोरात्रः पैत्रो–

मनुष्याक एक महीनेका पितरोंका दिनरात्रि होता है ॥

–वर्षेण दैवतः ।

और एक वर्षका देवताओंका दिनरात्रि होता है ॥

दैवे युगसहस्रे द्वे ब्राह्मः—

देवोंके दो हजार युगका ब्रह्माका दिनरात्रि होता है ॥

—कल्पौ तु तौ नृणाम् ॥ २१ ॥

उन दो युगसहस्रोंको मनुष्योंका कल्प कहते हैं, ब्रह्माका दिन मनुष्योंका स्थितिकाल और ब्रह्माकी रात्रि मनुष्योंका प्रलयकाल होता है ॥ २१ ॥

मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः ।

इकहत्तर दिव्यवर्षका नाम १-मन्वन्तर १ ॥

संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ॥ २२ ॥

प्रलयके नाम ५-संवर्त १ प्रलय २ कल्प ३क्षय ४कल्पान्त ५॥२२॥

अस्त्री पंकं पुमान्पाप्मा पापं किल्विषकल्मषम् । कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम् ॥ २३ ॥

पापके नाम १२-पंक १ पाप्मन् २ पाप ३ किल्विष४ कल्मष ५कलुष ६वृजिन ७ एनस् ८ अघ ९ अंहस् १० दुरित ११ दुष्कृत १२ ॥ २३॥

स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ।

धर्मके नाम ५-धर्म १ पुण्य २ श्रेयस् ३ सुकृत ४ वृष ५ ॥

मुत्प्रीतिः प्रमदो हर्षप्रमोदामोदसंमदाः ॥ २४ ॥ स्यादानन्दथुरानन्दः शर्मशातसुखानि च ।

हर्षके नाम १२-मुद् १ प्रीति २ प्रमद ३ हर्ष ४ प्रमोद ५ आमोद ६ सम्मद ७ ॥ २४॥ आनन्दथु ८ आनन्द ९ शर्मन् १० शात ११ सुख १२॥

श्वःश्रेयसं शिवं भद्रं कल्याणं मंगलं शुभम् ॥ २५ ॥ भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् । शस्तं चा—

कल्याणके नाम १२-श्वःश्रेयस् १ शिव २ भद्र ३ कल्याण ४ मंगल ५शुभ ६ ॥ २५॥ भावुक ७ भविक ८ भव्य ९ कुशल १० क्षेम ११शस्त १२॥

ऽथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च ॥ २६ ॥

पाप और पुण्यशब्द तथा सुखशब्दसे लेकर शस्तशब्द पर्यंत जो शब्द हैं वो यदि द्रव्यवाचक हों तो तीनों लिंगोंमें होते हैं ॥ २६ ॥

मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ । प्रशस्तवाचकान्यमू—

अच्छेके नाम ५—मतल्लिका १ मचर्चिका २ प्रकाण्ड ३ उद्ध ४ तल्लज ॥५॥

—न्ययः शुभावहो विधिः ॥२७॥

शुभकारक विधिका नाम १—अय १ ॥ २७ ॥

दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः।

भाग्यके नाम६—दैव १ दिष्ट२ भागधेय ३ भाग्य ४ नियति ५ विधि६॥

हेतुर्ना कारणं बीज-

कारणके नाम ३—हेतु १ कारण २ बीज ३ ॥

-न्निदानं त्वादिकारणम् ॥२८॥

आदिकारणका नाम १—निदान१॥२८

क्षेत्रज्ञ आत्मा पुरुषः-

चैतन्यके नाम ३—क्षेत्रज्ञ १ आत्मन् २ पुरुष ३ ॥

-प्रधानं प्रकृतिः स्त्रियाम्।

प्रकृतिके नाम २—प्रधान १ प्रकृति २ ॥

विशेषः कालिकोऽवस्था—

उमरका नाम १—अवस्था १ ॥

—गुणाः सत्त्वं रजस्तमः॥२९॥

गुणोंके नाम ३—सत्त्व १ रजस् २ तमस् ३ ॥ २९ ॥

जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः।

जन्मके नाम ६—जनुस् १ जनन २ जन्मन् ३ जनि४ उत्पत्ति ५ उद्भव६॥

प्राणी तु चेतना जन्मी जन्तुजन्युशरीरिणः ॥ ३० ॥

प्राणीके नाम ६—प्राणिन् १ चेतन २ जन्मिन् ३ जन्तु ४ जन्यु ५ शरीरिन् ६ ॥ ३० ॥

जातिर्जातं च सामान्यं-

जातिमात्रके नाम ३-जाति १ जात २ सामान्य ३ ॥

—व्यक्तिस्तु पृथगात्मता।

व्यक्तिवाचकके नाम २—व्यक्ति १ पृथगात्मता २ ॥

चित्तं तु चेतो हृदयं स्वांतं हृन्मानसं मनः ॥ ३१ ॥

मनके नाम ७—चित्त १ चेतस् २ हृदय ३ स्वान्त ४ हृद् ५ मानस ६ मनस् ७ ॥ ३१ ॥

इति कालवर्गः ॥ ४ ॥

अथ धीवर्गः ५.

बुद्धिर्मनीषा धीषणा धीः प्रज्ञा शेमुषी मतिः। प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः ॥ १ ॥

बुद्धिके नाम १४—बुद्धि १ मनीषा २ धिषणा ३ धी ४ प्रज्ञा ५

शेमुषी ६ मति ७ प्रेक्षा ८ उपलब्धि ९ चित् १० संविद् ११ प्रतिपद् १२ ज्ञप्ति १३ चेतना १४ ॥ १ ॥

धीर्धारणावती मेधा–

कही हुई वार्त्ताको धारण रखनेवाली बुद्धिका नाम १–मेधा १ ॥

–संकल्पः कर्म्म मानसम्।

मनकी कामनाका नाम १–संकल्प १॥

चित्ताभोगो मनस्कार–

किसी वस्तुमें चित्तके तत्पर होजानेके नाम २–चित्ताभोग १ मनस्कार२॥

श्चर्चा संख्या विचारणा ॥२॥

विचारके नाम ३–चर्चा १ संख्या २ विचारणा ३ ॥ २ ॥

अध्याहारस्तर्क ऊहो–

अपूर्व विचारके नाम ३–अध्याहार १ तर्क २ ऊह ३ ॥

–विचिकित्सा तु संशयः। संदेहद्वापरौ चा–

सन्देहके नाम ४–विचिकित्सा १ संशय २ संदेह ३ द्वापर ४ ॥

–थ समौ निर्णयनिश्चयौ॥३॥

निश्चयके नाम २–निर्णय १ निश्चय २ ॥ ३ ॥

मिथ्यादृष्टिर्नास्तिकता–

परलोकको मिथ्या जाननेके नाम२–मिथ्यादृष्टि १ नास्तिकता २ ॥

–व्यापादो द्रोहचिन्तनम्।

परद्रोहके नाम २–व्यापाद १ द्रोहचिन्तनम् २ ॥

समौ सिद्धान्तराद्धान्तौ–

निश्चय करी हुई बातके नाम २–सिद्धान्त १ राद्धान्त २ ॥

-भ्रान्तिर्मिथ्यामतिर्भ्रमः॥४ ॥

भ्रमके नाम ३–भ्रान्ति १ मिथ्यामति २ भ्रम ३ ॥ ४ ॥

संविदागूः प्रतिज्ञानं नियमाश्रयसंश्रवाः॥अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥ ५ ॥

प्रतिज्ञाके नाम १०–संविद् १ आगू २ प्रतिज्ञान ३ नियम ४आश्रव ५ संश्रव ६ अङ्गीकार ७ अभ्युपगम ८ प्रतिश्रव ९ समाधि १० ॥ ५ ॥

मोक्षे धीर्ज्ञान–

मोक्षमें बुद्धि लगानेका नाम १–ज्ञान ॥ १ ॥

मन्यत्र विज्ञानं शिल्पशास्त्रयोः

मोक्षसे अन्यत्र शिल्पविद्या और शास्त्रमें बुद्धि लगानेका नाम १–विज्ञान १ ॥

मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् ॥ ६ ॥

मोक्षोऽपवर्गो-

मोक्षके नाम ८ —मुक्ति १ कैवल्य २ निर्वाण ३ श्रेयस् ४ निःश्रेयस् ५ अमृत ६ ॥ ६ ॥ मोक्ष ७ अपवर्ग ८॥

-थाज्ञानमविद्याहंमतिः स्त्रियाम् ।

अज्ञानके नाम ३ —अज्ञान १ अविद्या २ अहम्मति ३ ॥

रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी ॥ ७ ॥

गोचरा इन्द्रियार्थाश्च-

पञ्चविषयोंके नाम ५—रूप १ शब्द २ गन्ध ३ रस ४ स्पर्श ५॥७॥

इकट्ठे रूपरसादिके नाम ३—विषय १ गोचर २ इन्द्रियार्थ ३ ॥

हृषीकं विषयीन्द्रियम् ।

इन्द्रियके नाम ३—हृषीक १ विषयि २ इन्द्रिय ३ ॥

कर्मेन्द्रियं तु पाय्वादि[1]-

कर्मेंद्रियोंके नाम—गुदा आदि ॥

—मनोनेत्रादि धीन्द्रियम् ॥ ८ ॥

ज्ञानेंद्रियोंके नाम—५ मनस् १ नेत्र[1] २ आदि ॥ ८ ॥

तुवरस्तु कषायोऽस्त्री मधुरो लवणः कटुः । तिक्तोऽम्लश्च रसाः पुंसि-

छः रसोंके नाम—तुवर— कषाय १ मधुर २ लवण ३ कटु ४ तिक्त ५ अम्ल ६ ॥

—तद्वत्सु षडमी त्रिषु ॥ ९ ॥

कषाय आदि रसवाचक शब्द यदि द्रव्यवाचक होवैं तो तीनों लिंगोंमें होते हैं ॥ ९ ॥

विमर्दोत्थे परिमलो गन्धे जनमनोहरे ।

मनुष्योंके मनको हरनेवाले घिसनेसे उत्पन्नहुए सुगन्धका नाम १—परिमल १

आमोदः सोऽतिनिर्हारी—

अत्यन्त मनको हरनेवाले सुगंधिका नाम १—आमोद १ ॥

—वाच्यलिङ्गत्वमागुणात् ॥ १० ॥

यहांसे लेकर "गुणे शुक्लादयः पुंसि" इससे पहले जो शब्द हैं वह, वाच्यलिंग अर्थात् विशेष्यलिंग होते हैं ॥ १० ॥

---

[1] पायूपस्थं पाणिपादौ वाक्चेतीन्द्रियसंग्रहः । भाषा—गुदा १ उपस्थ २ पाणि ३ पाद ४ और वाक् ५ यह पांच कर्मेन्द्रिय हैं ॥

[1] मनः कर्णस्तथा नेत्रं रसना च त्वचा सह । नासिका चेति षट् तानि धीन्द्रियाणि प्रचक्षते ॥ भाषा—मन १ कर्ण २ नेत्र ३ जिह्वा ४ त्वचा ५ और नासिका यह ६ ज्ञानेन्द्रिय (धीन्द्रिय) हैं ॥

समाकर्षी तु निर्हारी-
दूरसे ही जिसकी गन्ध आवे उसके नाम २–समाकर्षिन् १ निर्हारिन् २।
–सुरभिर्घ्राणतर्पणः
इष्टगन्धः सुगन्धिः स्या-
अत्युत्तमगन्धके नाम ४–सुरभि १ घ्राणतर्पण २ इष्टगन्ध ३ सुगंधि ४ ॥
दामोदी मुखवासनः॥ ११ ॥
मुखको सुगन्धित करनेवाले ताम्बूल आदिकी गन्धके नाम २–आमोदिन् १ मुखवासन २ ॥ ११ ॥
पूतिगन्धिस्तु दुर्गन्धो -
दुर्गन्धके नाम २–पूतिगन्धि १ दुर्गन्ध २ ॥
–विस्रं स्यादामगन्धि यत् ।
कच्चे मांसादिके गन्धका नाम १– विस्र १ ॥
शुक्लशुभ्रशुचिश्वेतविशदश्येत–पाण्डराः ॥ १२ ॥ अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः।
उज्ज्वलके नाम १३–शुक्ल १ शुभ्र २ शुचि ३ श्वेत ४ विशद ५ श्येत ६ पांडर ७॥ १२ ॥ अवदात ८ सित ९ गौर १० वलक्ष ११ धवल १२ अर्जुन १३ ॥
हरिणः पाण्डुरः पाण्डु-
कुछ पीलापन मिले हुए सफेद वर्णके नाम ३–हरिण १ पांडुर २ पांडु ३।
रीषत्पाण्डुस्तु धूसरः ॥ १३ ॥
किञ्चित् उज्ज्वलका नाम १– धूसर १ ॥ १३ ॥
कृष्णे नीलासितश्यामकाल–श्यामलमेचकाः ।
काले वर्णके नाम ७–कृष्ण १ नील २ असित ३ श्याम ४ काल ५ श्यामल ६ मेचक ७ ॥
पीतो गौरो हरिद्राभः-
पीले वर्णके नाम ३–पीत १ गौर २ हरिद्राभ ३ ॥
पालाशो हरितो हरित्॥ १४ ॥
हरेवर्णके नाम ३–पालाश १ हरित २ हरित् ३ ॥ १४ ॥
रोहितो लोहितो रक्तः-
लालवर्णके नाम ३–रोहित १ लोहित २ रक्त ३ ॥
शोणः कोकनदच्छविः ।
लाल कमलके समान वर्णके नाम २–शोण १ कोकनदच्छवि २ ॥
अव्यक्तरागस्त्वरुणः-
थोडे लालका नाम १–अरुण १॥
–श्वेतरक्तस्तु पाटलः ॥ १५ ॥

मिले हुए सफेद और लालवर्णका नाम १–पाटल १ ॥ १५ ॥

श्यावः स्यात्कपिशो–

मिले हुए काले और पीले रंगके नाम २–श्याव १ कपिश २ ॥

–धूम्रधूमलौ कृष्णलोहिते ।

मिले हुए काले और लालवर्णके नाम ३–धूम्र १ धूमल २ कृष्णलोहित ३॥

कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ ॥ १६ ॥

वानरकेसे रंगके नाम ६–कडार १ कपिल २ पिङ्ग ३ पिशङ्ग ४ कद्रु ५ पिंगल ६ ॥ १६ ॥

चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे ।

चित्रवर्णके नाम ६–चित्र १ किर्मीर २ कल्माष ३ शबल ४ एत ५ कर्बुर ६॥

गुणे शुक्लादयः पुंसि गुणिलिंगास्तु तद्वति ॥ १७ ॥

गुणवाचक शुक्ल आदि शब्द पुँलिंग होते हैं और द्रव्यवाचकशब्द द्रव्यके अनुसार लिङ्गमें होते हैं ॥ १७ ॥

इति धीवर्गः ॥ ५ ॥

अथ शब्दादिवर्गः ॥ ६ ॥

ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।

सरस्वतीके नाम ७ ब्राह्मी १ भारती २ भाषा ३ गिर्,गिरा ४ वाच् ५ वाणी ६ सरस्वती ७ ॥

व्याहार उक्तिर्लपितं भाषितं वचनं वचः ॥ १ ॥

बोलनेके नाम ६–व्याहार १ उक्ति २ लपित ३ भाषित ४ वचन ५ वचस् ॥ ६ ॥ १ ॥

अपभ्रंशोऽपशब्दः स्या–

अपभ्रष्ट अर्थात् व्याकरणकी रीतिसे अशुद्ध शब्दका नाम १–अपभ्रंश १ ॥

–च्छास्त्रे शब्दस्तु वाचकः ।

व्याकरणशास्त्रानुसार शुद्धशब्दका नाम १–शब्द १ ॥

तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता ॥ २ ॥

तिङन्तसुबन्तके समूह और कारकयुक्त क्रियाका नाम १–वाक्य १॥२॥

सब पापके नाश करनेवाले मंत्रका नाम १—अघमर्षण १ ॥ ४७ ॥

दर्शश्च पौर्णमासश्च यागौ पक्षान्तयोः पृथक् ।

अमावासके दिनके यज्ञका नाम१—दर्श१॥पौर्णमासीके दिनके यज्ञका नाम १—पौर्णमास १ ॥

शरीरसाधनापेक्षं नित्यं यत्कर्म तद्यमः ॥ ४८ ॥

अहिंसा सत्य चोरी न करना ब्रह्मचर्य्य अपरिग्रह (दान न लेना) इन नित्यकर्मका नाम १—यम १ ॥४८॥

नियमस्तु स यत्कर्म नित्यमागन्तुसाधनम् ।

शौच सन्तोष तप स्वाध्याय ईश्वरप्रणिधान इन आगन्तु कर्म साधनका नाम १—नियम १ ॥

उपवीतं ब्रह्मसूत्रं प्रोद्धृते दक्षिणे करे ॥ ४९ ॥

बांये कांधके जनेऊके नाम२—उपवीत १ ब्रह्मसूत्र २ ॥४९॥

प्राचीनावीतमन्यास्मिन्—

दहने कांधेपर रहेनेवाले जनेऊका नाम १—प्राचीनावीत १ ॥

—निवीतं कण्ठलम्बितम् ।

मालाकार यज्ञोपवीत पहिरनेका नाम १—निवीत १ ॥

अंगुल्यग्रे तीर्थं दैवं—

अंगुलियोंका अग्रभाग देवताओंका तीर्थ कहात है ॥

स्वल्पांगुल्यामूले कायम् ॥५०॥

कन अंगुलियोंके मूलका नाम प्रजापति तीर्थ है ॥ ५० ॥

मध्येऽङ्गुष्ठांगुल्योः पित्र्यं—

अंगुष्ठ और तर्जनी अंगुलीके मध्यमें पितृतीर्थ कहाता है ॥

—मूले त्वंगुष्ठस्य ब्राह्मम् ।

अंगुष्ठके मूलमें ब्राह्मतीर्थ कहाता है ॥

स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ॥ ५१ ॥

ब्रह्ममें मिल जानेके नाम ३—ब्रह्मभूय १ ब्रह्मत्व २ ब्रह्मसायुज्य ३॥५१॥

देवभूयादिकं तद्वत्—

देवमें मिल जानेके नाम ३—देवभूय १ देवत्व २ देवसायुज्य ३ ॥

–कृच्छ्रं सान्तपनादिकम् ।

गोमूत्र गोबर दूध दही घी कुशोदक इनका भक्षण करने और एकरात्रिके उपवासका नाम १–कृच्छ्र १ ॥

संन्यासवत्यनशने पुमान्प्रायो-

संन्यासपूर्वक भोजनत्यागका नाम १–प्राय १ ॥

–ऽथ वीरहा ॥ ५२ ॥ नष्टाग्निः–

जिस तपस्वीकी अग्नि बुझ गई हो उस तपस्विके नाम २–वीरहन् १ ॥ ५२ ॥ नष्टाग्नि २॥

–कुहना लोभान्मिथ्येर्यापथकल्पना ।

दम्भसे ध्यानादि करनेका नाम १–कुहना १ ॥

व्रात्यः संस्कारहीनः स्या–

जिस ब्राह्मणका गौणकालमें भी यज्ञोपवीत न हुआ हो उसका नाम १–व्रात्य १ ॥

–दस्वाध्यायो निराकृतिः ॥ ५३ ॥

वेदाभ्यासरहितका नाम १–निराकृति १ ॥ ५३ ॥

धर्मध्वजी लिङ्गवृत्ति–

बहुरूपिया ब्राह्मणके नाम २–धर्मध्वजिन् १ लिंगवृत्ति २॥

–रवकीर्णी क्षतव्रतः ॥

जिसका ब्रह्मचर्य नष्ट हो गया हो उसके नाम २–अवकीर्णिन् १ क्षतव्रत २॥

सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ॥ ५४ ॥ अंशुमानभिनिर्मुक्ताभ्युदितौ च यथाक्रमम् ।

सायंसंध्यामें सोनेवालेका नाम १–अभिनिर्मुक्त १ ॥ प्रातःकालकी संध्यामें सोनेवालेका नाम १–अभ्युदित १ ॥ ५४

परिवेत्ताऽनुजोऽनूढे ज्येष्ठे दारपरिग्रहात् ॥ ५५ ॥

जिसका बडा भाई न व्याहा गया हो प्रथम छोटा व्याहा जाय तो उस छोटेका नाम १–परिवेत्तृ १ ॥ ५५ ॥

परिवित्तिस्तु तज्ज्यायान्–

उसके बडे भाइका नाम १–परिवित्ति १ ॥

–विवाहोपयमौ समौ । तथा परिणयोद्वाहोपयामाः पाणिपीडनम् ॥ ५६ ॥

विवाहके नाम ६–विवाह १ उपयम २ परिणय ३ उद्वाह ४ उपयाम ५ पाणिपीडन ६ ॥ ५६ ॥

व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतम् ।

मैथुनके नाम ५–व्यवाय १ ग्राम्यधर्म २ मैथुन ३ निधुवन ४ रत ५॥

त्रिवर्गो धर्मकामार्थै-

वेदविहितयज्ञादि विधि, स्त्रीसेवन, न्यायसे धनोपार्जन, इनका नाम १-त्रिवर्ग १ ॥

-श्चतुर्वर्गः समोक्षकैः ॥ ५७ ॥

और मोक्षकरक युक्त धर्म अर्थ काम हों तो उसका नाम १-चतुर्वर्ग १ ॥ ५७ ॥

सबलैस्तैश्चतुर्भद्रं-

और वेद धर्मादि सबल हों तो उनका नाम १-चतुर्भद्र १ ॥

-जन्यास्स्निग्धा वरस्य ये ॥ ५८ ॥

वरानी अर्थात् वरके पक्षवालोंका नाम-१ ॥ जन्य १ ॥ ५८ ॥

इति ब्रह्मवर्गः ॥ ७ ॥

अथ क्षत्रियवर्गः ८.

मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ।

क्षत्रियके नाम ५-मूर्द्धाभिषिक्त १ राजन्य २ बाहुज ३ क्षत्रिय ४ विराज् ५ ॥

राजा राट् पार्थिवक्ष्माभृन्नृप-भूपमहीक्षितः ॥ १ ॥

राजाके नाम ७-राजन् १ राज् २ पार्थिव ३ क्ष्माभृत् ४ नृप ५ भूप ६ महीक्षित् ७ ॥ १ ॥

राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः ।

जो बहुत राजाओंका मालिक हो उसका नाम १-अधीश्वर १ ॥

चक्रवर्ती सार्वभौमो-

समुद्रपर्यन्तपृथ्वीका जिसका राज्य हो उसके नाम २-चक्रवर्तिन् १ सार्वभौम २ ॥

-नृपोऽन्यो मण्डलेश्वरः ॥ २ ॥

बारहहजार ४००० कोशके भूमंडलके राजाका नाम १-मण्डलेश्वर १ ॥ २ ॥

येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः । शास्ति यश्चाज्ञया राज्ञः स सम्राट्-

वही मण्डलेश्वर राजसूययज्ञ किये हो और सब राजाओंका शिक्षक हो तो उसका नाम १-सम्राज् १ ॥

-डथ राजकम् ॥ ३ ॥ राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात् ।

राजाओंके गणका नाम १-राजक १ ॥ ३ ॥ और क्षत्रियोंके गणका नाम १-राजन्यक १ ॥

मन्त्री धीसचिवोऽमात्यो-

मंत्रीके नाम ३-मन्त्रिन् १ धीसचिव २ अमात्य ३ ॥

-ऽन्ये कर्मसचिवास्ततः ॥ ४ ॥

मंत्रीसे छोटे अन्य मुसाहिबोंका नाम १-कर्मसचिव १ ॥ ४ ॥

महामात्राः प्रधानानि-

मुख्यमंत्रीके नाम २- महामात्र १ प्रधान २ ॥

-पुरोधास्तु पुरोहितः ।

पुरोहितके नाम २- पुरोधस् १ पुरोहित २ ॥

द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शकौ ॥ ५ ॥

पंच अर्थात् न्यायाधीशके नाम२- प्राड्विवाक १ अक्षदर्शक २ ॥ ५ ॥

प्रतिहारो द्वारपालद्वाःस्थद्वाःस्थितदर्शकाः ।

द्वारपालके नाम ५-प्रतीहार १ द्वारपाल२द्वाःस्थ३द्वाःस्थित४दर्शक५॥

रक्षिवर्गस्त्वनीकस्थो-

रखवालेके नाम २-रक्षिवर्ग १ अनीकस्थ २ ॥

-ऽथाध्यक्षाधिकृतौ समौ ॥ ६॥

अधिकारीके नाम २-अध्यक्ष १ अधिकृत २ ॥ ६ ॥

स्थायुकोऽधिकृतो ग्रामे-

एक ग्रामके ठेकेदारका नाम १- स्थायुक १ ॥

गोपो ग्रामेषु भूरिषु ।

बहुत ग्रामोंके ठेकेदारका नाम१- गोप १ ॥

भौरिकः कनकाध्यक्षो-

सोनेके अधिकारीके नाम २- भौरिक १ कनकाध्यक्ष २ ॥

-रूपाध्यक्षस्तु नैष्किकः ॥७॥

खजानजीके नाम २-रूपाध्यक्ष १ नैष्किक २ ॥ ७ ॥

अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जनः ।

जो जनानेकी वस्तुओंका अधिकारी हो उसका नाम १-अन्तर्वंशिक १ ॥

सौविदल्लाःकञ्चुकिनः स्थापत्याः सौविदाश्च ते ॥ ८ ॥

राजा वा राजस्त्रियोंके निकट जो बेंत लिये हुए खडे रहते हैं उनके नाम ४-सौविदल्ल१ कञ्चुकिन् २ स्थापत्य ३ सौविद ४ ॥ ८ ॥

षण्ढो वर्षवरस्तुल्यौ-

खोजोंके नाम२-षण्ढ१वर्षवर२॥

-सेवकार्थ्यनुजीविनः ।

सेवक वा नौकरके नाम ३-सेवक १ आर्थिन् २ अनुजीविन् ३ ॥

विषयानन्तरो राजा शत्रु-

राजाके देशके पासके राजाका नाम १-शत्रु १ ॥

-र्मित्रमतः परम् ॥ ९ ॥

उसके अन्य राजाका नाम १- मित्र १ ॥ ९ ॥

उदासीनः परतरः-

इन शत्रु मित्रोंसे पर अन्य राजाओंका नाम १-उदासीन १॥

-पार्ष्णिग्राहस्तु पृष्ठतः।

अपने राज्यके पीछे राजा हो उसका नाम १-पार्ष्णिग्राह १॥

रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः॥ १०॥ द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः॥ अभिघातिपराऽरातिप्रत्यर्थिपरिपन्थिनः॥ ११॥

दुश्मनके नाम १९-रिपु १ वैरिन् २ सपत्न ३ अरि ४ द्विषत् ५ द्वेषण ६ दुर्हृद् ७॥ १०॥ द्विष् ८ विपक्ष ९ अहित १० अमित्र ११ दस्यु १२ शात्रव १३ शत्रु १४ अभिघातिन् १५ पर १६ अराति १७ प्रत्यर्थिन् १८ परिपंथिन् १९॥ ११॥

वयस्यः स्निग्धः सवया-

हमजोलीके नाम ३-वयस्य १ स्निग्ध २ सवयस् ३॥

-अथ मित्रं सखा सुहृत्।

मित्रके नाम ३-मित्र १ सखि २ सुहृद् ३॥

सख्यं साप्तपदीनं स्या-

मित्रताके नाम २-सख्य १ साप्तपदीन २॥

-दनुरोधोऽनुवर्तनम्॥ १२॥

१०

भला मनाने(मुलाहिजे)के नाम २-अनुरोध १ अनुवर्त्तन २॥ १२॥

यथार्हवर्णः प्रणिधिरपसर्पश्चरस्पशः। चारश्च गूढपुरुष-

जासूस वा हालकारेके नाम ७-यथार्हवर्ण १ प्रणिधि २ अपसर्प ३ चर ४ स्पश ५ चार ६ गूढपुरुष ७॥

-श्चाप्तप्रत्ययितौ समौ॥ १३॥

विश्वासीके नाम २-आप्त १ प्रत्ययित २॥ १३॥

सांवत्सरो ज्योतिषिको दैवज्ञगणकावपि। स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि॥ १४॥

ज्योतिषी पण्डितके नाम ८-सांवत्सर १ ज्योतिषिक २ दैवज्ञ ३ गणक ४ मौहूर्तिक ५ मौहूर्त ६ ज्ञानिन् ७ कार्तान्तिक ८॥ १४॥

-तान्त्रिको ज्ञातसिद्धान्तः-

शास्त्रके नाम २-तान्त्रिक १ ज्ञातसिद्धान्त २॥

सत्री गृहपतिः समौ-

मोदीके नाम-सत्रिन् १ गृहपति २॥

लिपिकरोऽक्षरचणोऽक्षरचुञ्चुश्च लेखकः॥ १५॥

लेखकके नाम ४-लिपिकर १ अक्षरचण २ अक्षरचुञ्चु ३ लेखक ४॥ १५॥

लिखिताक्षरविन्यासे लिपिर्लि-बिर्मे स्त्रियौ ।

लिखे हुए लेखके नाम ४—लिखित १ अक्षरविन्यास २ लिपि ३ लिबि ४॥

स्यात्सदेशहरो दूतो—

दूतके नाम २—संदेशहर १ दूत २

—दूत्यं तद्भावकर्मणी ॥ १६ ॥

दूतपनका नाम १—दूत्य १॥१६॥

अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि ।

रस्तेगीरके नाम ५—अध्वनीन १ अध्वग २ अध्वन्य ३ पान्थ ४ पथिक ५॥

स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्ग-बलानि च ॥ १७ ॥ राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च ।

स्वामी (राजा) अमात्य (मन्त्री) सुहृद् (मित्र) कोश (खजाना) राष्ट्र (देशकी भूमि) दुर्ग (दुर्गमस्थान) बल (फौज) ॥ १७ ॥ पुरवासी और शिल्पी इन सबके नाम २—राज्याङ्ग १ प्रकृति २॥

संधिर्ना विग्रहो यानमासनं द्वैध-माश्रयः ॥ १८ ॥ षड्गुणाः—

सुवर्णादि देके शत्रुके मिलानेका नाम १—सन्धि १ ॥ शत्रुके साथ बिगडनेका नाम १—विग्रह १॥ शत्रुपर चढाई करनेका नाम १—यान १॥ अपने स्थानपर तैयार हो रहनेका नाम १—आसन १ ॥

शत्रुके अधिकारियोंमें फूट करानेका नाम १—द्वैध १ ॥ दूसरेका आसरा लेनेका नाम १—आश्रय १॥१८॥ ये छः गुण कहलाते हैं॥

—शक्तयस्तिस्रः प्रभावोत्साह-मन्त्रजाः ।

राजाकी शक्तियोंके नाम ३—प्रभावज १ उत्साहज २ मन्त्रज ३ ॥

क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम् ॥ १९ ॥

नीतिशास्त्रोक्त क्षय स्थान वृद्धिका नाम १—त्रिवर्ग ॥ १९ ॥

स प्रतापः प्रभावश्च यत्तेजः कोशदण्डजम् ।

खजाना और दडके प्रभावके नाम २—प्रताप १ प्रभाव २ ॥

सामदाने भेददण्डावित्युपायच-तुष्टयम् ॥ २० ॥

राजाके चारों उपायोंके नाम ४—सामन् १ दान २ भेद ३ दण्ड ४ ॥२०॥

साहसं तु दमो दण्डः—

दण्ड देनेके नाम ३—साहस १ दम २—दण्ड ३ ॥

—साम सान्त्व—

सलूक करनेके नाम २—सामन् १ सान्त्व २ ॥

–मथो समौ ॥ भेदोपजापा-

फरक डालनेके नाम २–भेद १ उपजाप २ ॥

–वुपधौ धर्माद्यैर्यत्परीक्षणम् २१

धर्म अर्थ काम और भयस मंत्री इत्यादिकोंकी परीक्षा करनेका नाम१– उपधा १ ॥ २१ ॥

पञ्च त्रि–

–अषडक्षीण आदि निःशलाक पर्य्यन्त पांच शब्द तीनों लिगोंमें होते हैं॥

–ष्वषडक्षीणो यस्तृतीयाद्यगोचरः ।

दो जनोंकी ही सलाहका नाम १ - अषडक्षीण १ ॥

विविक्तविजनच्छन्ननिःशलाका स्तथा रहः ॥ २२ ॥ रहश्चोपांशु चालिङ्ग–

एकान्तके नाम ७–विविक्त१– विजन २ छन्न ३ निश्शलाक ४रहस५ ॥ २२ ॥ रह ६ उपांशु ७ ॥

–रहस्यं तद्भवे त्रिषु ।

एकान्तकी बात वा कामका नाम १–रहस्य १ ॥

समौ विस्रम्भविश्वासौ–

विश्वासके नाम २–विस्रम्भ १ विश्वास २ ॥

–भ्रेषो भ्रंशो यथोचितात्॥२३॥

अन्यायका नाम १–भ्रेष१॥२३॥

अभ्रेषन्यायकल्पास्तु देशरूपं समञ्जसम् ।

न्यायके नाम ५–अभ्रेष १ न्याय २ कल्प ३ देशरूप ४ समञ्जस ५ ॥

युक्तमौपयिकं लभ्यं भजमानाभिनीतवत् ॥ २४ ॥ न्याय्यं च त्रिषु षट्–

न्यायसे जो वस्तु ली जावे उसके नाम ६–युक्त २ औपयिक२ लभ्य ३ भजमान ४–अभिनीत ५ ॥ २४ ॥ न्याय ६–ये छः शब्द त्रिलिंग हैं॥

- संप्रधारणा तु समर्थनम् ।

यही उचित है ऐसे निश्चय करनेके नाम २–सम्प्रधारणा १ समर्थन २ ॥

अववादस्तु निर्देशो निदेशः शासनं च सः ॥ २५ ॥ शिष्टिश्चाज्ञा च–

आज्ञाके नाम ६–अववाद१निर्देश २ निदेश ३ शासन४॥ २५ ॥ शिष्टि ५ आज्ञा ६ ॥

–संस्था तु मर्यादा धारणास्थितिः ।

मर्य्यादाके नाम ४–संस्था–१ मर्यादा २ धारणा ३ स्थिति ४ ॥

आगोऽपराधो मन्तुश्च-

अपराधके नाम ३-आगस् १ अपराध २ मन्तु ३ ॥

-समे तूद्दानबन्धने ॥ २६ ॥

बन्धनके नाम २-उद्दान १ बन्धन २ ॥ २६ ॥

द्विपाद्यो द्विगुणो दण्डो-

दूने दण्डका नाम १-द्विपाद्य १॥

-भागधेयः करो बलिः ।

करके नाम ३-भागधेय १ कर २ बलि ३ ॥

घट्टादिदेयं शुल्कोऽस्त्री-

घाटी वगैरहमें देने योग्य महसूलके नाम १-शुल्क १ ॥

-प्राभृतं तु प्रदेशनम् ॥ २७ ॥

मित्रादिकोंको भेट वा नजर देनेके नाम॥-२-प्राभृत १ प्रदेशन २॥२७॥

-उपायनमुपग्राह्यमुपहारस्तथोपदा ।

राजाको भेंट वा नजर देनेके नाम४-उपायन१उपग्राह्य२उपहार३उपदा४॥

यौतकादि तु यद्देयं सुदायो हरणं च तत् ॥ २८ ॥

दहेज वा भाईबन्धुओंके देनेकी वस्तुके नाम२-सुदाय१हरण २॥२८॥

तत्कालस्तु तदात्वं स्या-

वर्तमानसमयके नाम २-तत्काल १ तदात्व २ ॥

-दुत्तरः काल आयतिः ।

आनेवाले समयका नाम १-आयति१॥

सांदृष्टिकं फलं सद्य-

तुरन्तक फलका नाम१-सांदृष्टिक१

-उदर्कः फलमुत्तरम् ॥ २९ ॥

आगेके होनेवालेका नाम १-उदर्क १ ॥ २९ ॥

अदृष्टं वह्नितोयादि-

आग लगने और अतिवृष्टि होने आदि उत्पातका नाम १-अदृष्ट १ ॥

-दृष्टं स्वपरचक्रजम् ।

अपने या पराये राज्यसे चोरादिके भयका नाम १-दृष्ट १ ॥

महीभुजामहिभयं स्वपक्षप्रभवं भयम् ॥ ३० ॥

अपने सहायकसे भयका नाम १-अहिभय१ ॥ ३० ॥

प्रक्रिया त्वधिकारः स्या-

कानून चलानेके नाम२-प्रक्रिया१ अधिकार २ ॥

-च्चामरं तु प्रकीर्णकम् ।

चँवरके नाम२-चामर१प्रकीर्णक२

नृपासनं यत्तद्भद्रासनं-

मणि आदिसे बनीहुई राज गद्दीके नाम २-नृपासन १ भद्रासन २ ॥

-सिंहासनं तु तत् ॥ ३१ ॥
हैमं-

कदाचित् वही राजाके बैठनेका स्थान सोनेसे बना हो तो उसका नाम १-सिंहासन १ ॥ ३१ ॥

-छत्रं त्वातपत्रं-

छतुरीके नाम२-छत्र१आतपत्र२॥

-राज्ञस्तु नृपलक्ष्म तत् ।

राजाके छत्रका नाम१-नृपलक्ष्मन् १॥

भद्रकुम्भः पूर्णकुम्भो-

भरे घटेके नाम २-भद्रकुम्भ १ पूर्णकुम्भ २ ॥

भृङ्गारः कनकालुका ॥ ३२ ॥

झारी या गडुवेके नाम २-भृंगार १ कनकालुका २ ॥ ३२ ॥

निवेशः शिबिरं षण्डे-

डेराके नाम २-निवेश१शिबिर२॥

-सज्जनं तूपरक्षणम् ।

पहरेके नाम२-सज्जन१उपरक्षण२॥

हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम् ॥ ३३ ॥

हाथी घोडा रथ सिपाही इन सबका नाम १-सेनाङ्ग १ ॥ ३३ ॥

दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः । मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥ ३४ ॥ इभः स्तम्बेरमः पद्मी-

हाथीके नाम १५-दन्तिन्१दन्तावल२हस्तिन् ३ द्विरद ४ अनेकप ५ द्विप६मतंगज७गज८नाग ९कुञ्जर१० वारण ११ करिन् १२॥३४॥इभ१३ स्तम्बेरम १४ ॥ पद्मिन् १५ ॥

-यूथनाथस्तु यूथपः ।

हाथियोंके सिरदार हाथीके नाम २-यूथनाथ १ यूथप २ ॥

मदोत्कटो मदकलः-

मदान्ध हाथीके नाम२-मदोत्कट १ मदकल २ ॥

-कलभः करिशावकः ॥३५॥

हाथीके बच्चोंके नाम २-कलभ १ करिशावक २ ॥ ३५ ॥

प्रभिन्नो गर्जितो मत्तः-

जिसके मद बहता हो उसके नाम ३-प्रभिन्न १ गर्जित २ मत्त ३ ॥

-समावुद्वान्तनिर्मदौ ।

बेमदवालेके नाम २-उद्वान्त १ निर्मद २ ॥

हास्तिकं गजता वृन्दे-

हाथियोंके समूहके नाम२-हास्तिक १ गजता २ ॥

-करिणी धेनुका वशा ॥ ३६ ॥

हथिनीके नाम ३-करिणी १ धेनुका २ वशा ३ ॥३६ ॥

गण्डः कटो-

हाथीके गालके नाम २-गण्ड १ कट २ ॥

-मदो दानं-

हाथीके मदके नाम २- मद १ दान २ ॥

-वमथुः करशीकरः

हाथीकी सूँडसे पानी निकलनेके नाम २-वमथु १ करशीकर २ ॥

कुम्भौ तु पिण्डौ शिरस-

हाथीके मस्तकके मांसका नाम १-कुम्भ १ ॥

-स्तयोर्मध्ये विदुः पुमान्॥३७॥

दोनों कुम्भोंके मध्यमें जो खाली रहता है उसका नाम १ विदु॥१३७॥

-अवग्रहो ललाटं स्या-

हाथीके लिलारका नाम १-अवग्रह १ ॥

-दीषिका त्वक्षिकूटकम् ।

उसके नेत्रोंकी गोलाईके नाम २-ईषिका १ अक्षिकूटक २ ॥

अपांगदेशो निर्याणं-

उसके निहारनेका नाम १-निर्याण१॥

-कर्णमूलं तु चूलिका ॥ ३८ ॥

हाथीके जहांसे कान जमते हैं उस जगहका नाम १-चूलिका १॥३८॥

अधः कुम्भस्य वाहित्थं-

हाथीके लिलारके नीचका नाम १-वाहित्थ १ ॥

प्रतिमानमधोऽस्य यत् ।

वाहित्थके नीचेका नाम १-प्रतिमान १ ॥

आसनं स्कन्धदेशः स्यात्-

हाथीके कन्धेका नाम१-आसन१॥

-पद्मकं बिन्दुकालकम् ३९ ॥

हाथीके बिंदुओंका नाम १-पद्मक १ ॥ ३९ ॥

पार्श्वभागः पक्षभागो-

हाथीकी बगलके नाम २-पार्श्वभाग१ पक्षभाग २ ॥

-दन्तभागस्तु योऽग्रतः ।

हाथीके आगेके भागका नाम १-दन्तभाग १ ॥

द्वौ पूर्वपश्चाज्जंघादिदेशौ गात्रावरे क्रमात् ॥ ४० ॥

हाथीके आगेके जंघादि भागका नाम १ गात्र १ ॥ हाथीके पीछेके भागका नाम १-अवर १ ॥ ४० ॥

तोत्रं वेणुक-

चाबुककी डण्डीके नाम २-तोत्र १ वेणुक २ ॥

-मालानं बन्धस्तम्भे-

हाथीके खूटेका नाम१-आलान१॥

–ऽथ शृंखले । अन्दुको निगडोऽस्त्री स्या–

हाथीकी जंजीरके नाम ३–शृंखल १ अन्दुक २ निगड ३ ॥

दंकुशोऽस्त्री सृणिः स्त्रियाम ॥४१॥

अंकुशके नाम २ अंकुश १ सृणि २ ॥ ४१॥

दूष्या कक्ष्या वरत्रा च–

हाथीकी कमर बांधनेकी रस्सीके नाम ३–दूष्या १ कक्ष्या २ वरत्रा ३

–कल्पना सज्जना समे ।

मालिकके चढनेके वास्ते हाथीको तैयार करनेके नाम २–कल्पना १ सज्जना २ ॥

प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः ॥ ४२ ॥

गद्दी वा झूलके नाम ५–प्रवेणी आस्तरण २ वर्ण ३ परिस्तोम ४ कुथ ५ ॥ ४२ ॥

–वीतं त्वसारं हस्त्यश्वं–

हाथी घोडेका नाम १–वीत १॥

–वारी तु गजबन्धनी ।

जिस भूमिमें हाथी बांधे जायँ उसका नाम १–वारी १ ॥

घोटके वीतितुरगतुरङ्गाश्वतुरङ्गमाः ॥ ४३ ॥ वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः ।

घोडेके नाम १३–घोटक १ वीति २ तुरग ३ तुरङ्ग ४ अश्व ५ तरङ्गम ६ ॥ ४३ ॥ वाजिन् ७ वाह ८ अर्वन् ९ गन्धर्व १० हय ११ सैन्धव १२ सप्ति १३ ॥

आजानेयाः कुलीनाः स्यु–

कुलीन घोडेका नाम १ आजानेय १-

–र्विनीताः साधुवाहिनः ॥४४॥

सीखे हुए घोडेका नाम १–विनीत १ ॥ ४४ ॥

वनायुजाः पारसीकाः काम्बोजा बाह्लिका हयाः ।

वनायु देशमें पैदा हुए घोडेका नाम १–वनायुज १ ॥

पारसदेशोत्पन्न घोडेका नाम १। पारसीक १ ॥

काबुली घोडेका नाम १–बाह्लिक १

ययुरश्वोऽश्वमेधीयो–

अश्वमेधके श्यामकर्णवाले घोडेका नाम १–ययु १ ॥

–जवनस्तु जवाधिकः ॥ ४५ ॥

जल्दी चलनेवाले घोडेका नाम १॥ जवन १ ॥ ४५ ॥

पृष्ठ्यः स्थौरी-

लदनेवाले घोडेके नाम २–पृष्ठ्य १ स्थौरिन् २ ॥

–सितः कर्को–

उजले घोडेका नाम १–कर्क १॥

रथ्यो वोढा रथस्य यः।

रथके घोडेका नाम १–रथ्य १ ॥

बालः किशोरो–

घोडेके बच्चेके नाम १–किशोर १

–वाम्यश्वा वडवा–

घोडीके नाम ३–वामी १ अश्वा २ वडवा ३ ॥

–वाडवं गणे ॥ ४६ ॥

घोडीके समूहका नाम १-वाडव १ ॥ ४६

त्रिष्वाश्वीनं यदश्वेन दिनेनैकेन गम्यते।

घोडेके एक दिन चलने योग्य मार्गका नाम १--आश्वीन १ ॥

कश्यं तु मध्यमाश्वानां–

घोडेके मध्यभागका नाम १-कश्य १ ॥

–हेषा ह्रेषा च निःस्वनः ॥ ४७ ॥

घोडेके शब्दका नाम २--हेषा १ ह्रेषा २ ॥ ४७ ॥

निगालस्तु गलोद्देशे–

घोडेके गलका नाम १–निगाल १ ॥

–वृन्दे त्वश्वीयमाश्ववत्।

घोडोंके समूहका नाम २–अश्वीय १ आश्व २ ॥

आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् ॥ ४८ ॥ गतयोऽमूः पञ्च धारा–

घोडेके पांच प्रकारकी चालोंके नाम ५--आस्कन्दित १ धौरितक २ रेचित ३ वल्गित ४ प्लुत ५॥४८॥

–घोणा तु प्रोथमस्त्रियाम्।

घोडेकी नाकका नाम १–प्रोथ १ ॥

कविका तु खलीनोऽस्त्री–

घोडेकी लगामके नाम २--कविका १ खलीन २ ॥

–शफं क्लीबे खुरः पुमान् ॥ ४९ ॥

घोडेके खुरके नाम २- शफ १ खुर २ (क्षुर) ३ ४९ ॥

पुच्छोऽस्त्री लूमलांगूले–

पूछके नाम ३–पुच्छ १ लूम २ लांगूल ३॥

–वालहस्तश्च वालधिः।

वालसहित पूँछके नाम २–वालहस्त १ वालधि २ ॥

त्रिषूपावृत्तलुठितौ परावृत्ते मुहुर्भुवि ॥ ५० ॥

पृथ्वीमें लोटनके नाम २–उपावृत्त १ लुठित २ ॥ ५० ॥

याने चक्रिणि युद्धार्थे शताङ्गः स्यन्दनो रथः।

युद्धके रथके नाम ३–शतांग १ स्यन्दन २ रथ ३ ॥

असौ पुष्परथश्चक्रयानं न समराय यत् ॥ ५१ ॥

सामान्य रथका नाम १–पुष्परथ १ ॥ ५१ ॥

कर्णीरथः प्रवहणं डयनं च समं त्रयम् ।

स्त्रियोंकी गाडीके नाम ३–कर्णीरथ १ प्रवहण २ डयन ३ ॥

क्लीबेऽनः शकटोऽस्त्री स्या–

छकडेके नाम २–अनस १ शकट २॥

–द्गन्त्री कम्बलिवाह्यकम्॥५२॥

गाडीके नाम २–गन्त्री १ (गान्त्री) कम्बलिवाह्यक २ ॥ ५२ ॥

शिबिका याप्ययानं स्या–

पालकीके नाम २–शिबिका १ याप्ययान २ ॥

–द्दोला प्रेंखादिका स्त्रियाम् ।

दोली वा हिंडोलेके नाम २–दोला १ प्रेंखा २ ॥

उभौ तु द्वैपवैयाघ्रौ द्वीपिचर्मावृते रथे ॥ ५३ ॥

जिसमें बघेरेके चमडेका परदा हो उसके नाम २–द्वैप १ वैयाघ्र २ ॥ ५३ ॥

पाण्डुकम्बलसंवीतः स्यन्दनः पाण्डुकम्बली ।

पीले रंगवाले परदेके रथका नाम १–पाण्डुकम्बली १ ॥

रथे काम्बलवास्त्राद्याः कम्बलादिभिरावृते ॥ ५४ ॥

कम्बलके परदेवाले रथका नाम १–काम्बल १ ॥ ५४ ॥

त्रिषु द्वैपादयो–

द्वैप आदि शब्द तीनों लिंगोंमें होते हैं ॥

–रथ्या रथकट्या रथव्रजे ।

रथके समूहके नाम २–रथ्या १ रथकड्या २ ॥

धूः स्त्री क्लीबे यानमुखं–

धूःके नाम २–धुर् १ यानमुख २॥

स्याद्रथाङ्गमपस्करः ॥ ५५ ॥

तांगेके नाम २–रथांग १ अपस्कर २ ॥ ५५ ॥

चक्रं रथाङ्गं–

पहियेके नाम २–चक्र १ रथाङ्ग २॥

–तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमान् ।

रथकी नेमिके नाम २–नेमि १ प्रधि २

पिण्डिका नाभि–

पुढीके नाम २–पिण्डिका १ नाभि २॥

–रक्षाग्रकीलके तु द्वयोराणिः ॥ ५६ ॥

कुलावेका नाम १–अणि १॥५६

रथगुप्तिर्वरूथो ना–

लोहे जडे रथके आवरणके नाम२-रथगुप्ति १ वरूथ २ ॥

कूबरस्तु युगंधरः ।

काठके जुएके बांधनेके स्थानके नाम २-कूबर १ युगंधर २ ॥

अनुकर्षो दार्वधःस्थं

जुगनका नाम १-अनुकर्ष १ ॥

-प्रासङ्गो ना युगाद्युगः ॥५७॥

जुएके नाम२-प्रासंग१युग२॥५७॥

सर्वं स्याद्वाहनं यानं युग्यं पत्रं च धोरणम् ॥

सवारीके नाम ५-वाहन १ यान २ युग्य ३ पत्र ४ धोरण ५

परम्परावाहनं यत्तद्वैनीतकमस्त्रियाम ॥ ५८ ॥

कहार आदि वाहनोंका नाम १-वैनीतक १ ॥ ५८ ॥

आधोरणा हस्तिपका हस्त्यारोहा निषादिनः ।

हाथीवान्के नाम ४-आधोरण १ हस्तिपक२हस्त्यारोह ३निषादिन्४ ॥

नियंता प्राजिता यन्ता सूतः क्षत्ता च सारथिः ॥ ५९ ॥ सव्येष्ठदक्षिणस्थौ च संज्ञा रथकुटुम्बिनः ।

रथादिके हाँकनेवालेके नाम ८-नियन्तृ १ प्राजितृ २ यन्तृ ३ सूत ४ क्षत्तृ ५ सारथि ६॥५९॥ सव्येष्ठ ७ दक्षिणस्थ ८ ॥

रथिनः स्यन्दनारोहा-

रथके ऊपर चढके लडनेवालोंके नाम २-रथिन् १ स्यन्दनारोह २ ॥

अश्वारोहास्तु सादिनः॥ ६० ॥

घुडसवारोंके नाम २-अश्वारोह १ सादिन् २ ॥ ६० ॥

भटा योधाश्च योद्धारः-

लडनेवालेके नाम ३- भट १ योध २ योद्धृ ३ ॥

-सेनारक्षास्तु सैनिकाः ।

पहरा देनेवालेके नाम२-सेनारक्ष१ सैनिक २ ॥

सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते ॥ ६१ ॥

सम्पूर्ण सेनाके नाम २-सैन्य १ सैनिक २ ॥ ६१ ॥

बलिनो ये सहस्रेण साहस्रास्ते सहस्रिणः ॥

हजार सिपाहियोंके मालिकके नाम २-साहस्र १ सहस्रिन् २ ॥

परिधिस्थः परिचरः-

जो फौज रखानेके अर्थ चारोंतरफ घूमता है उसके नाम २-परिधिस्थ १ परिचर २ ॥

—सेनानीर्वाहिनीपतिः ॥ ६२ ॥

सेनाके मालिकके नाम २—सेनानी १ वाहिनीपति २ ॥ ६२ ॥

कञ्चुको वारवाणोऽस्त्री—

योद्धाओंको युद्धके समय पहरनेके वस्त्रके नाम २—कञ्चुक १ वारबाण २॥

—यत्तु मध्ये सकञ्चुकाः ।

बध्नंति तत्सारसनमधिकाङ्गो—

इसे पहन कर जो योद्धा पट्टी बांधते हैं उसके नाम २— सारसन १ अधिकांग २ ॥

—थ शीर्षकम् ॥ ६३ ॥ शीर्षण्यं च शिरस्त्रे—

टोपके नाम ३— शीर्षक १॥६३॥ शीर्षण्य २ शिरस्त्र ३ ॥

—ऽथ तनुत्रं वर्म दंशनम्। उरश्छदः कङ्कटको जगरः कवचोऽस्त्रियाम् ॥ ६४ ॥

कवचके नाम ७—तनुत्र १ वर्मन् २ दंशन ३ उरश्छद ४ कंकटक ५ जगर ६ कवच ७ ॥ ६४ ॥

आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत् ।

पहिरे हुए कवचके नाम ४—आमुक्त १ प्रतिमुक्त २ पिनद्ध ३ अपिनद्ध ४॥

संनद्धो वार्मितः सज्जो दंशितो व्यूढकङ्कटः ॥ ६५ ॥

मंत्रादि कवच धारण किये हुएके नाम ५— संनद्ध १ वार्मित २ सज्ज ३ दंशित ४ व्यूढकंकट ५ ॥ ६५ ॥

त्रिष्वामुक्तादयो—

आमुक्त आदि शब्द तीनों लिंगोंमें होते है ।

—वर्मभृतां कावचिकं गणे ।

कवच धारण करनेवालोंके समूहका नाम १— कावचिक १ ॥

पदातिपत्तिपदगपादातिकपदाजयः ॥ ६६ ॥ पद्गश्च पदिकश्चा—

पैदलके नाम ७—पदाति १ पत्ति २ पदग ३ पादातिक ४ पदाजि ५ ॥ ६६ ॥ पद्ग ६ पदिक ७ ॥

—ऽथ पादातं पत्तिसंहतिः ॥

पैदलसमूहके नाम २—पादात १ पत्तिसंहति २ ॥

शस्त्राजीवे काण्डपृष्ठायुधीयायुधिकाः समाः ॥ ६७ ॥

जो हथियार बांधकर जीविका करते हैं उनके नाम ४—शस्त्राजीव १ काण्डपृष्ठ २ आयुधीय ३ आयुधिक ४॥६७

कृतहस्तः सुप्रयोगविशिखः कृतपुंखवत् ॥

तीरन्दाजके नाम ३—कृतहस्त १ सुप्रयोगविशिख २ कृतपुंख ३ ॥

अपराद्धपृषत्कोऽसौ लक्ष्याद्य-श्च्युतसायकः ॥ ६८ ॥

जिसका तीर निशानेसे चूक जाय उसका नाम १—अपराद्धपृषत्क १ ।६८

धन्वी धनुष्मान्धानुष्को निषङ्ग्यस्त्री धनुर्धरः ।

धनु वा बाण बांधनेवालेके नाम ६ ॥ धन्विन् १ धनुष्मत् २ धानुष्क निषंगिन् ४ अस्त्रिन् ५ धनुर्धर ६ ।

स्यात्काण्डवांस्तु काण्डीरः

केवल बाण बांधनेवालेके नाम २—काण्डवत् १ काण्डीर २ ।।

--शाक्तीकः शाक्तिहेतिकः ॥ ६९ ॥

शक्ति आदि शस्त्रधारीके नाम २ शाक्तीक १ शक्तिहेतिक २ ।। ६९ ।।

याष्टीकपारश्वधिकौ यष्टिपार्श्वधहेतिकौ ।

लठिया रखनेवालेका नाम १ याष्टीक १ ।। फरसा बांधनेवालेका नाम १ पारश्वधिक १ ॥

नैस्त्रिंशिकोऽसिहेतिः स्या—

तरवार बांधे हुएके नाम २—नैस्त्रिंशिक १ असिहेति २ ॥

--त्समौ प्रासिककौन्तिकौ ७० ॥

बल्लमके बांधनेवालेका नाम १—प्रासिक १ ॥ भालेवालेका नाम १ कौन्तिक २ ॥ ७० ॥

चर्मी फलकपाणिः स्या—

ढाल बांधनेवालेके नाम २—चर्मिन् १ फलकपाणि २ ॥

—त्पताकी वैजयन्तिकः ।

निशान बाधनवालेके नाम २—पताकिन् १ वैजयंतिक २ ॥

अनुप्लवः सहायश्चानुचरोऽभिचरः समाः ॥ ७१ ॥

सहायकके नाम ४—अनुप्लव १ सहाय २ अनुचर ३ अभिचर ४ ॥ ७१ ॥

पुरोगाग्रेसरप्रष्ठाग्रतःसरपुरःसराः । पुरोगमः पुरोगामी—

अग्रगामीके नाम ७—पुरोग १ अग्रेसर २ प्रष्ठ ३ अग्रतस्सर २ पुरस्सर ५ पुरोगम ६ पुरोगामिन् ॥ ७ ॥

—मन्दगामी तु मन्थरः ॥ ७२ ॥

धीरे चलनेवालेके नाम २—मन्दगामिन् १ मन्थर २ ॥ ७२ ॥

जंघालोऽतिजवस्तुल्यो—

जादे चलनेवालेके नाम २—जंघाल १ अतिजव २ ॥

जंघाकरिकजांघिकौ ।

जो जंघाके बलसे जीता है उसके नाम २—जंघाकरिक १ जांघिक २ ॥

तरस्वी त्वरितो वेगी प्रजवी जवनो जवः ॥ ७३ ॥

वेगसे चलनेवालेके नाम६—तरस्विन् १ त्वरित२ वेगिन्३ प्रजविन् ४ जवन ५ जव ६ ॥ ७३ ॥

जय्यो यः शक्यते जेतुं—

जिसे जीत सके उसका नाम१—जय्य १ ॥

—जेयो जेतव्यमात्रके।

जीतने लायकका नाम १—जेय१॥

जैत्रस्तु जेता—

जो जीतसके उसके नाम२—जैत्र १ जेतृ २ ॥

—यो गच्छत्यलं विद्विषतः प्रति ॥ ७४ ॥ सोऽभ्यमित्र्योऽभ्यमित्रीयोऽप्यभ्यमित्रीण इत्यपि।

सामर्थ्यसे शत्रुओंके संमुख जानेवालेके नाम ३—॥७४॥ अभ्यमित्र्य १ अभ्यमित्रीय २ अभ्यमित्रीण ३ ॥

ऊर्जस्वलः स्यादूर्जस्वी य ऊर्जातिशयान्वितः ॥ ७५ ॥

पहलवानके नाम ३—ऊर्जस्वल १ ऊर्जस्विन् २ ऊर्जातिशय ३ ॥७५॥

स्यादुरस्वानुरसिलो—

बडी छातीवालेके नाम२—उरस्वत् १ उरसिल २ ॥

—रथिनो रथिको रथी।

रथके स्वामीके नाम ३—रथिन ३ रथिक २ रथिन् ३ ॥

कामङ्गाम्यनुकामीनो—

जो अपने मनसे चलता हो उसका नाम १—अनुकामीन १ ॥

—ह्यत्यन्तीनस्तथा भृशम् ॥ ७६ ॥

वारम्वार चलनेवालेका नाम १ अत्यन्तीन १ ॥ ७६ ॥

शूरो वीरश्च विक्रान्तो—

शूरके नाम ३—शूर १ वीर २ विक्रांत ३ ॥

—जेता जिष्णुश्च जित्वरः।

जीतनेवालेके नाम३—जेतृ १ जिष्णु २ जित्वर ३ ॥

सांयुगीनो रण साधु—

युद्धकुशलका नाम१—सांयुगीन१।

—श्शस्त्राजीवादयस्त्रिषु ॥ ७७ ॥

शस्त्राजीव आदि शब्द तीनों लिंगोंमें होते हैं ॥७७॥

ध्वजिनी वाहिनी सेना पृतनानीकिनी चमूः। वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम्॥७८॥

सेनाके नाम ११—ध्वजिनी १ वाहिनी२सेना ३पृतना ४अनीकिनी५ चमू ६वरूथिनी ७बल ८ सैन्य ९ चक्र १० अनीक ११ ॥ ७८ ॥

व्यूहस्तु बलविन्यासो—

सेनाकी रचनाके नाम २-व्यूह १ बलविन्यास २ ॥

-भेदा दण्डादयो युधि ।

सेनाकी रचनाके अनेकभेद दण्ड इत्यादि १ ॥ ये चक्र, मयूर, कमल आदिक व्यूह हैं॥

प्रत्यासारो व्यूहपार्ष्णिः-

व्यूहके पीछेके नाम२-प्रत्यासार१ व्यूहपार्ष्णि २ ॥

सैन्यपृष्ठे प्रतिग्रहः ॥ ७९ ॥

फौजके पीछेके नाम २ -सैन्यपृष्ठ१ प्रतिग्रह २ ॥ ७९ ॥

एकेभैकरथा त्र्यश्वा पत्तिः पञ्च पदातिका ।

जिसमें हाथी १ रथ२ घोडे३ पैदल ५हों उस सेनाका नाम-पत्ति १ ॥

पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ॥ ८० ॥ सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः । अनीकिनी-

क्रमसे तिगुने पत्ति(पैदलों)के नाम ७-॥८०॥(तीने पत्तिका(पैदलों)का नाम)-सेनामुख१ (तीन सेनामुखका नाम) गुल्म १॥(तीन गुल्मका नाम) गण १ ॥ (तीन गणका नाम) वाहिनी १ ॥ (तीन वाहिनीका नाम) पृतना १ ॥ (तीन पृतनाका नाम)चमू १॥ (तीन चमूका नाम) अनीकिनी १॥

-दशानीकिन्यक्षौहिणी-

दश अनीकिनीका नाम १-अक्षौहिणी १ ॥

अक्षौहिणी आदि सेनाका प्रमाण ।

सेना	पैदल (पत्ति)	सेना मुख	गुल्म	गण	वाहिनी	पृतना	चमू	अनीकिनी	अक्षोहिणी
हाथी,रथ	१	३	९	२७	८१	२४३	७२९	२१८७	२१८७०
घोडे	३	९	२७	८१	२४३	७२९	२१८७	६५६१	६५६१०
पैदल	५	१५	४५	१३५	४०५	१२५५	३६४५	१०९३५	१०९३५०

--व्यथ संपदि ॥८१॥ संपत्तिः श्रीश्च लक्ष्मीश्च-

सम्पत्तिके नाम ४-संपद्१॥८१॥ सपत्ति २ श्री ३ लक्ष्मी ४ ॥

-विपत्त्यां विपदापदौ ॥

विपत्तिके नाम३-विपत्ति १ विपद् २ आपद् ३ ॥

आयुधं तु प्रहरणं शस्त्रमस्त्र-

हथियारके नाम ४—आयुध १ प्रहरण २ शस्त्र ३ अस्त्र ४ ॥

—मथास्त्रियां ॥ ८२ ॥ धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम्। इष्वासोऽ—

धनुषके नाम ७ ॥ ८२ ॥ धनुष १ चाप २ धन्वन् ३ शरासन ४ कोदण्ड ५ कार्मुक ६ इष्वास ७ ॥

—ऽथ कर्णस्य कालपृष्ठं शरासनम् ॥ ८३ ॥

राजा कर्णके धनुषका नाम १—कालपृष्ठ १ ॥ ८३ ॥

कपिध्वजस्य गाण्डीवगाण्डिवौ पुंनपुंसकौ ।

अर्जुनके धनुषके नाम २—गाण्डीव १ गाण्डिव २ ॥

कोटिरस्याटनी—

धनुषके दोनो कोनोंके नाम २—कोटि १ अटनी २ ॥

—गोधातले ज्याघातवारणे॥८४॥

चमडेके दस्तानोंके नाम २—गोधा १ तल २ ॥ ८४ ॥

लस्तकस्तु धनुर्मध्यं—

धनुषके मध्यभागका नाम १—लस्तक १ ॥

—मौर्वी ज्या शिञ्जिनी गुणः ।

धनुषकी प्रत्यञ्चाके नाम ४—मौर्वी १ ज्या २ शिञ्जिनी ३ गुण ४ ॥

स्यात्प्रत्यालीढमालीढमित्यादि स्थानपञ्चकम् ॥ ८५ ॥

धनुषधारियोंके आसनविशेषके नाम २—प्रत्यालीढ १ आलीढ २ ॥ इत्यादि पांच स्थान ॥ ८५ ॥

लक्षं लक्ष्यं शरव्यं च—

निशानेके नाम ३—लक्ष १ लक्ष्य २ शरव्य ३ ॥

—शराभ्यास उपासनम् ।

बाण छोडनेके अभ्यासके नाम २—शराभ्यास १ उपासन २ ॥

पृषत्कबाणविशिखा अजिह्मगखगाशुगाः ॥ ८६ ॥ कलम्बमार्गणशराः पत्री रोप इषुर्द्वयोः ।

बाणके नाम १२—पृषत्क १ बाण २ विशिख ३ अजिह्मग ४ खग ५ आशुग ६ ॥ ८६ ॥ कलम्ब ७ मार्गण ८ शर ९ पत्रिन् १० रोप ११ इषु १२ ॥

प्रक्ष्वेडनास्तु नाराचाः—

लोहेके तीरके नाम २—प्रक्ष्वेडन १ नाराच २ ॥

—पक्षो वाज—

बाणके पक्षके नाम २—पक्ष १ वाज २ ॥

—स्त्रिषूत्तरे ॥ ८७ ॥

—लिप्तकपर्यंत सब शब्द तीनों लिंगोंमें होते हैं ॥ ८७ ॥

निरस्तः प्रहिते बाणे-

छोडे हुये बाणका नाम १-निरस्त १।

—विषाक्ते दिग्धलिप्तकौ ।

विषयुक्त बाणके नाम ३—विषाक्त १ दिग्ध २ लिप्तक ३ ॥

तूणोपासङ्गतूणीरनिषंगा इषुधिर्द्वयोः ॥ ८८ ॥ तूण्यां-

तरकसके नाम ६—तूण १ उपासंग २ तूणीर ३ निषंग ४ इषुधि ५ ॥ ८८ ॥तूणी ६ ॥

—खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः । कौक्षेयको मण्डलाग्रः करवालः कृपाणवत् ॥ ८९ ।

तलवारके नाम ९—खड्ग १ निस्त्रिंश २ चन्द्रहास ३ असि ४ रिष्टि ५ कौक्षेयक ६ मण्डलाग्र ७ करवाल ८ कृपाण ९ ॥ ८९

त्सरुः खड्गादिमुष्टौ स्या-

तलवार आदिकी मूठका नाम १-त्सरु १॥

—न्मेखला तन्निबन्धनम् ।

तलवारके म्यानका नाम १—मेखला १॥

फलकोऽस्त्री फलं चर्म-

ढालके नाम ३—फलक १ फल २ चर्मन् ३ ॥

—संग्राहो मुष्टिरस्य यः ॥ ९० ॥

ढालकी मूठका नाम १—संग्राह १ ॥ ९० ॥

द्रुघणो मुद्गरघनौ-

मुद्गरके नाम—३ द्रुघण १ मुद्गर २ घन ३॥

—स्यादीली करवालिका ।

गुप्तिके नाम २—ईली १ करवालिका २॥

भिन्दिपालः सृगस्तुल्यौ-

गोफनके नाम २—भिन्दिपाल १ सृग २॥

—परिघः परिघातिनः ॥ ९१ ॥

परिघके नाम २—परिघ १ परिघातिन् २ ॥ ९१ ॥

द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः ।

कुल्हाडीके नाम ४—कुठार १ स्वधिति २ परशु ३ परश्वध ४ ॥

स्याच्छस्त्री चासिपुत्री च छुरिका चासिधेनुका ॥ ९२ ॥

छुरिके नाम ४—शस्त्री १ असिपुत्री २ छुरिका ३ असिधेनुका ४॥ ९२॥

वा पुंसि शल्य शंकुर्ना-

बर्छीके नाम २—शल्य १ शंकु २ ॥

— सर्वला तोमरोऽस्त्रियाम्—

गडासके नाम २—सर्वला १ तोमर २॥

प्रासस्तु कुन्तः-

भालेके नाम २—प्रास १ कुन्त २॥

—कोणस्तु स्त्रियः पाल्यश्रिकोटयः ॥ ९३ ॥

लङ्कादिकी नोंकके नाम ४—कोण १ पालि २ अश्रि ३ कोटि ४ ॥ ९३ ॥

सर्वाभिसारः सर्वौघः सर्वसंनहनार्थकः ।

सेनाकी तैयारीके नाम ३—सर्वाभिसार १ सर्वौघ २ सर्वसंनहन ३ ॥

लोहाभिसारोऽस्त्रभृतां राज्ञां नीराजनाविधिः ॥ ९४ ॥

महानवमीके पहिले लडाईके निमित्त राजाओंका शस्त्र पूजनेका नाम १—लोहाभिसार १ ॥ ९४ ॥

यत्सेनयाभिगमनमरौ तदभिषेणनम् ॥

शत्रुक ऊपर सेना चढनेका नाम १—अभिषणन १ ॥

यात्रा व्रज्याऽभिनिर्याणं प्रस्थानं गमनं गमः ॥ ९५ ॥

चलनेके नाम ६—यात्रा १ व्रज्या २ अभिनिर्याण ३ प्रस्थान ४ गमन ५ गम ६ ॥ ९५ ॥

स्यादासारः प्रसरणं—

सेनाके फैलनके नाम २—आसार १ प्रसरण २ ॥

—प्रचक्रं चलितार्थकम् ।

चली हुई सेनाके नाम २—प्रचक्र १ चलित २ ॥

आहितान्प्रत्यभीतस्य रणे यानमाभिक्रमः ॥ ९६ ॥

निडर होकर शत्रुपर चढाईका नाम १—अभिक्रम १ ॥ ९६ ॥

वैतालिका बोधकरा—

प्रातःकालके राजाके जगानेवालोंके नाम २—वैतालिक १ बोधकर २ ॥

—श्चक्रिका घाण्टिकार्थकाः ।

घडियालीके नाम २—चक्रिक १ घाण्टिक २ ॥

स्युर्मागधास्तु मगधा—

राजाका वंश वर्णन करनेवालेके नाम २—मागध १ मगध २ ॥

बन्दिनः स्तुतिपाठकाः ॥ ९७ ॥

भाटके नाम २—बन्दिन् १ स्तुतिपाठक २ ॥ ९७ ॥

संशप्तकास्तु समयात्संग्रामादनिवर्तिनः ।

शपथ खाकर युद्धमें पीठ न देनेवालेका नाम १—संशप्तक १ ॥

रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः ॥ ९८ ॥

धूलिके नाम ४—रेणु १ धूलि २ पांसु ३ रजस् ४ ॥ ९८ ॥

चूर्णे क्षोदः—

चूनके नाम २—चूर्ण १ क्षोद २ ॥

-समुत्पिञ्जपिञ्जलौ भृशमाकुले ।

अकुलानेके नाम २-समुत्पिञ्ज १ पिञ्जल २ ॥

पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम् ॥ ९९ ॥

झंडेके नाम ४-पताका १ वैजयन्ती २ केतन ३ ध्वज ४ ॥ ९९ ॥

सा वीराशंसनं युद्धभूमिर्याऽतिभयप्रदा ।

भययुद्धके स्थानका नाम १-वीराशंसन १ ॥

अहं पूर्वमहं पूर्वमित्यहंपूर्विका स्त्रियाम् ॥ १०० ॥

जिसमें वीर कहैं कि, हम पहले लडेंगे हम पहले लडेंगे उस लडाईका नाम १-अहंपूर्विका १ ॥ १०० ॥

आहोपुरुषिका दर्पाद्या स्यात्संभावनात्मनि ।

जिसमें कहैं कि हम पुरुष हैं हमही लडेंगे उसकानाम १-आहोपुरुषिका १॥

अहमहमिका तु सा स्यात्परस्परं यो भवत्यहंकारः ॥ १०१ ॥

आपसके इस कहनेको कि, हम शक्त हैं हम लड सकते हैं उसका नाम १-अहमहमिका १ ॥ १०१ ॥

द्रविणं तरः सहोबलशौर्याणि स्थाम शुष्मं च । शक्तिः पराक्रमः प्राणो-

पराक्रमके नाम १०-द्रविण १ तरस् २ सहस् ३ बल ४ शौर्य ५ स्थामन् ६ शुष्म ७ शक्ति ८ पराक्रम ९ प्राण १० ॥

-विक्रमस्त्वतिशक्तिता ॥ १०२ ॥

अतिपराक्रमके नाम २-विक्रम १ अतिशक्तिता २ ॥ १०२ ॥

वीरपानं तु यत्पानं वृत्ते भाविनि वा रणे ।

लडनेके निमित्त पहले या पीछे नशा खाने पीनेका नाम १-वीरपान १ ॥

युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् ॥ १०३ ॥ मृधमास्कन्दनं संख्यं समीकं साम्परायिकम् । अस्त्रियां समरानीकरणाः कलहविग्रहौ ॥ १०४ ॥ संप्रहाराभिसंपातकलिसंस्फोटसंयुगाः । अभ्यामर्दसमाघातसंग्रामाभ्यागमाहवाः ॥ १०५ ॥ समुदायः स्त्रियः संयत्समित्याजिसमिद्युधः ।

युद्धके नाम ३१-युद्ध १ आयोधन २ जन्य ३ प्रधन ४ प्रविदारण ५ ॥ १०३ ॥ मृध ६ आस्कन्दन ७ संख्य ८ समीक ९

सांपरायिक १० समर ११ अनीक १२ रण १३ कलह १४ विग्रह १५ ॥ १०४ ॥ संप्रहार १६ अभिसम्पात १७ कलि १८ संस्फोट १९ संयुग २० अभ्यामर्द २१ समाघात २२ संग्राम २३ अभ्यागम २४ आहव २५ ॥ १०५ ॥ समुदाय २६ संयत् २७ समिति २८ आजि २९ समित् ३० युध ३१ ॥

नियुद्धं बाहुयुद्धे स्यात्-

भुजाके युद्धके नाम २-नियुद्ध १ बाहुयुद्ध २ ॥

तुमुलं रणसंकुले ॥ १०६ ॥

घोर संग्रामका नाम १-तुमुल १ ॥ ॥ १०६ ॥

क्ष्वेडा तु सिंहनादः स्यात्-

वीरोंके गर्जनेके नाम २-क्ष्वेडा १ सिंहनाद २ ॥

-करिणां घटना घटा ।

हाथियोंके समूहके नाम २-घटना १ घटा २ ॥

क्रन्दनं योधसंरावो-

युद्धके शब्दका नाम १-क्रन्दन १ ॥

-बृंहितं करिगर्जितम् ॥ १०७ ॥

हाथीके शब्दका नाम १-बृंहित १ ॥ ॥ १०७ ॥

विस्फारो धनुषः स्वानः-

धनुषके शब्दका नाम १-विस्फार १

-पटहाडम्बरौ समौ ।

नगाडेके शब्दके नाम २-पटह १ आडंबर २ ॥

प्रसभं तु बलात्कारो हठो-

हठके नाम ३-प्रसभ १ बलात्कार २ हठ ३ ॥

-ऽथ स्खलितं छलम् ॥ १०८ ॥

धोखा देनेके नाम २-स्खलित १ छल २ ॥ १०८ ॥

अजन्यं क्लीबमुत्पात उपसर्गः समं त्रयम् ।

उत्पातके नाम ३-अजन्य १ उत्पात २ उपसर्ग ३ ॥

मूर्च्छा तु कश्मलं मोहो-

मूर्च्छाके नाम ३-मूर्च्छा १ कश्मल २ मोह ३ ॥

-ऽप्यवमर्दस्तु पीडनम् ॥ १०९ ॥

देशादिको उपद्रव देनेके नाम २-अवमर्द १ पीडन २ ॥ १०९ ॥

अभ्यवस्कन्दनं त्वभ्यासादनं-

धोकेसे दवा लेनेके नाम २-अभ्यव॰स्कन्दन १ अभ्यासादन २ ॥

-विजयो जयः ।

जीतके नाम २-विजय १ जय २ ॥

वैरशुद्धिः प्रतीकारो वैरनिर्यातनं च सा ॥ ११० ॥

वैर दूर करनेके नाम ३—वैरशुद्धि १ प्रतीकार २ वैरनिर्यातन ३॥११०॥

प्रद्रावोद्द्रावसन्द्रावसन्दावा विद्रवो द्रवः। अपक्रमोऽपयानं च-

पलायन (भागने) के नाम ८—प्रद्राव १ उद्द्राव २ संद्राव ३ संदाव ४ विद्रव ५ द्रव ६ अपक्रम ७ अपयान ८॥

—रणेभङ्गः पराजयः॥ १११॥

हारके नाम २—रणेभङ्ग १ पराजय २॥ १११॥

पराजितपराभूतौ—

हारे हुएके नाम २—पराजित १ पराभूत २॥

—त्रिषु नष्टतिरोहितौ।

छिपे हुएके नाम २—नष्ट १ तिरोहित २॥

प्रमापणं निबर्हणं निकारणं विशारणम्॥ ११२॥ प्रवासनं परासनं निषूदनं निहिंसनम्। निर्वासनं संज्ञपनं निर्ग्रन्थनमपासनम्॥ ११३॥ निस्तर्हणं निहननं क्षणनं परिवर्जनम्। निर्वापणं विशसनं मारणं प्रतिघातनम्॥११४॥ उद्वासनप्रमथनक्रथनोज्जासनानि च। आलम्भपिञ्जविशरघातोन्माथवधा अपि॥ ११५॥

मारनेके नाम ३०—प्रमापण १ निबर्हण २ निकारण ३ विशारण ४॥॥ ११२॥ प्रवासन ५ परासन ६ निषूदन ७ निहिंसन ८ निर्वासन ९ संज्ञपन १० निर्ग्रन्थन ११ अपासन १२॥॥ ११३॥ निस्तर्हण १३ निहनन १४ क्षणन १५ परिवर्जन १६ निर्वापण १७ विशसन १८ मारण १९ प्रतिघातन २०॥ ११४॥ उद्वासन २१ प्रमथन २२ क्रथन २३ उज्जासन २४ आलम्भ २५ पिञ्ज २६ विशर २७॥ घात २८ उन्माथ २९ वध ३०॥॥ ११५॥

स्यात्पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः। अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम्॥ ११६॥

मृत्युके नाम १०—पञ्चता १ कालधर्म २ दिष्टान्त ३ प्रलय ४ अत्यय ५ अन्त ६ नाश ७ मृत्यु ८ मरण ९ निधन १०॥ ११६॥

परासुप्राप्तपञ्चत्वपरेतप्रेतसंस्थिताः। मृतप्रमीतौ त्रिष्वेते—

मृत्युको प्राप्त हुएके नाम ७—परासु १ प्राप्तपञ्चत्व २ परेत ३ प्रेत ४ संस्थित ५ मृत ६ प्रमीत ७॥

–चिता चित्या चितिः स्त्रियाम् ॥ ११७ ॥

चिताके नाम ३– चिता १ चित्या २ चिति ३ ॥ ११७ ॥

कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेवरम् ।

शिररहित चेष्टा करनेवाले शरीरका नाम १–कबन्ध १ ॥

श्मशानं स्यात्पितृवनं–

श्मशानके नाम २–श्मशान १ पितृवन २ ॥

–कुणपः शवमस्त्रियाम्॥ ११८॥

मुर्देके नाम २–कुणप १ शव २ ॥ ॥ ११८ ॥

प्रग्रहोपग्रहौ बन्द्यां–

कैदीके नाम ३–प्रग्रह १ उपग्रह २ वन्दी ३ ॥

–कारा स्याद्बन्धनालये ।

जेहलखानेका नाम १–कारा १॥

पुंसि भूम्न्यसवः प्राणाश्चैवं–

प्राणके नाम २–असु १ प्राण २ ॥

–जीवोऽसुधारणम् ॥ ११९ ॥

जीवके नाम २–जीव १ असुधारण २ ॥ ११९ ॥

आयुर्जीवितकालो–

आयुका नाम १–आयुष् १ ॥

–ना जीवातुर्जीवनौषधम् ।

मृतसंजीवनी बूटीके नाम २– जीवातु १ जीवनौषध २ ॥

इति क्षत्रियवर्गः ॥ ८ ॥

अथ वैश्यवर्गः ९.

ऊरव्या ऊरुजा अर्या वैश्य भूमिस्पृशो विशः ।

वैश्यके नाम ६–ऊरव्य १ ऊरुज २ अर्य ३ वैश्य ४ भूमिस्पृक् ५ विश् ६॥

आजीवो जीविका वार्ता वृत्तिर्वर्तनजीवने ॥ १ ॥

जीविकाके नाम ६–आजीव १ जीविका २ वार्ता ३ वृत्ति ४ वर्तन ५ जीवन ६ ॥ १ ॥

स्त्रियां कृषिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः ।

जीविकाके भेद ३–(खेती करनेका नाम) कृषि १ ॥ (पशुपालनका नाम) पाशुपाल्य २ ॥ (व्यापारका नाम) वाणिज्य ३ ॥ ये तीनों वैश्यवृत्ति हैं ॥

सेवा श्ववृत्ति–

परसेवाके नाम २–सेवा १ श्ववृत्ति २ ॥

–रनृतं कृषि–

खेतीके नाम २–अनृत १ कृषि २ ॥

–रुञ्छाशिलं त्वृतम् ॥ २ ॥

उञ्छवृत्तिके नाम ३–उञ्छ १ शिल २ ऋत ३ ॥ २ ॥

द्वे याचितायाचितयोर्यथासंख्यं मृतामृते।

मांगनेसे प्राप्त हुई वस्तुका नाम १– मृत १ ॥ विना मांगे प्राप्त हुई वस्तुका नाम १–अमृत १ ॥

सत्यानृतं वणिग्भावः स्या–

व्यापारके नाम २–सत्यानृत १ वणिग्भाव २ ॥

–दृणं पर्युदश्चनम् ॥ ३ ॥ उद्धारो-

कर्जके नाम ३–ऋण १ पर्युदश्चन २ ॥ ३ ॥ उद्धार ३ ॥

–ऽर्थप्रयोगस्तु कुसीदं वृद्धिजीविका।

व्याजके नाम ३–अर्थप्रयोग १ कुसीद २ वृद्धिजीविका ३ ॥

याच्ञयाप्तं याचितकं

मांगनेकी वस्तुका नाम १–याचितक १ ॥

–निमयादापमित्यकम् ॥ ४ ॥

बायदेपर ली हुई वस्तुका नाम १– आपमित्यक १ ॥ ४ ॥

उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात्।

ऋण देनेवालेका नाम १–उत्तमर्ण १ ॥ ऋणके लेनेवालेका नाम १–अधमर्ण १ ॥

कुसीदिको वार्धुषिको वृद्ध्याजीवश्च वार्धुषिः ॥ ५ ॥

व्याजसे जीनेवालेके नाम ४–कुसीदिक १ वार्धुषिक २ वृद्ध्याजीव ३ वार्धुषि ४ ॥ ५ ॥

क्षेत्राजीवः कर्षकश्च कृषिकश्च कृषीवलः।

किसानके नाम ४–क्षेत्राजीव १ कर्षक २ कृषिक ३ कृषीवल ४ ॥

क्षेत्रं व्रैहेयशालेयं व्रीहिशाल्युद्भवोचितम् ॥ ६ ॥

व्रीहि होनेके योग्य खेतका नाम १– व्रैहेय १ ॥ धानके खेतका नाम १–शालेय १ ॥ ६ ॥

यव्यं यवक्यं षष्टिक्यं यवादिभवनं हि यत्।

जौके खेतके नाम १–यव्य १ ॥ छोटे जौके खेतका नाम १–यवक्य १ ॥ साठीके खेतका नाम १–षष्टिक्य १ ॥

तिल्यं तैलीनवन्माषोमाणुभंगा द्विरूपता ॥ ७ ॥

तिलके खेतके नाम २–तिल्य १ तैलीन २ ॥ उरद होनेवालेके नाम २– माष्य १ माषीण २ ॥ अलसी होनेवालेके

नाम २–उम्य १ औमीन २ ॥ अणुके होनेवालेके नाम२–अणव्य १ आणवीन २ ॥भंग (भांग) होनेवालेका नाम २–भंग्य १ भंगीन २ ॥ ७ ॥

मौद्गीनकौद्रवीणादिशेषधान्योद्भवक्षमम् ।

मूंग होनेवालेका नाम १–मौद्गीन १॥ कोदों होनेवाले खेतका नाम१–कौद्रवीण १ ॥ चणे होनेवाले खेतका नाम १–चाणकीन १ ॥ गेहूं होनेवालेका नाम १–गौधूमीन१इत्यादि॥

बीजाकृतं तूप्तकृष्टे–

बीज बोनेका नाम १–बीजाकृत१॥

–सीत्यं कृष्टं च हल्यवत् ॥८॥

जोते हुए खेतके नाम ३–सीत्य १ कृष्ट २ हल्य ३ ॥ ८ ॥

त्रिगुणाकृतं तृतीयाकृतं त्रिहल्यं त्रिसीत्यमपि तस्मिन् ।

तीन वार जुते हुए खेतके नाम४–त्रिगुणाकृत १ तृतीयाकृत २ त्रिहल्य ३ त्रिसीत्य ४ ॥

द्विगुणाकृते तु सर्वं पूर्वं शम्बाकृतमपीह ॥ ९ ॥

दो बार जुते हुएके नाम ४–द्विगुणाकृत १ द्वितीयाकृत २ द्विहल्य ३ द्विसीत्य ४ ॥ ९ ॥

द्रोणाढकादिवापादौ द्रौणिकाढकिकादयः ।

जिसमें द्रोण (१०२४)तोला धानआदि बोया जाय उस खेतका नाम १–द्रौणिक १॥ आढक (२५६) तोला भरवालेका नाम १–आढकिक १ ॥ आदि ॥

खारीवापस्तु खारीक–

जिसमें खारी (४ द्रोण अर्थात् ४०९६) तोलाभर अन्न बोया जाय उसका नाम १–खारीक १ ॥

–उत्तमर्णादयस्त्रिषु ॥ १० ॥

उत्तमर्णादि शब्द तीनों लिंगोंमें होते हैं ॥ १० ॥

पुंनपुंसकयोर्वप्रः केदारः क्षेत्र–

खेतके नाम३–वप्र१केदार२क्षेत्र३॥

–मस्य तु । कैदारकं स्यात्कैदार्यं क्षैत्रं कैदारिकं गणे ॥ ११ ॥

खेतके समूहके नाम४–कैदारक१ कैदार्य २ क्षैत्र ३ कैदारिक४॥ ११॥

लोष्टानि लेष्टवः पुंसि–

ढेलेके नाम२–लोष्ट१ लेष्टु २ ॥

–कोटिशो लोष्टभेदनः ।

मुंगरीके नाम २– कोटिश १ लोष्टभेदन २ ॥

प्राजनं तोदनं तोत्रं–

पैने (लाठी, चाबुक आदि) के नाम ३–प्राजन १ तोदन२ तोत्र३ ॥

खनित्रमवदारणे ॥ १२ ॥

कुदालके नाम २-खनित्र १ अवदारण २ ॥ १२ ॥

दात्रं लवित्र-

खुरपा फावडा आदिके नाम २-दात्र १ लवित्र २ ॥

-माबन्धो योत्रं योक्त्र-

नाथके नाम ३-आबन्ध १ योत्र २ योक्त्र ३ ॥

-मथो फलम् । निरीशं कुटकं फालः कृषको-

फाल अर्थात् हलके नीचे लग हुए लोहेके नाम ५-फल १ निरीश २ कुटक ३ फाल ४ कृषक ५ ॥

-लाङ्गलं हलम् ॥ १३ ॥ गोदारणं च सीरो-

हलके नाम ४-लाङ्गल १ हल २ ॥ १३ ॥ गोदारण ३ सीर ४ ॥

-ऽथ शम्या स्त्री युगकीलकः ।

सैले (सिमल) के नाम २-शम्या १ युगकीलक २ ॥

ईषा लाङ्गलदण्डः स्यात्-

हलस (हाल) के नाम २-ईषा १ लाङ्गलदण्ड २ ॥

-सीता लाङ्गलपद्धतिः ॥ १४ ॥

हलकी रेखा (खूड) के नाम २-सीता १ लाङ्गलपद्धति २ ॥ १४ ॥

पुंसि मेधिः खलेदारु न्यस्तं यत्पशुबन्धने ।

जो धान्यमर्दन करनेक स्थान अर्थात् पैरमें गाडे हुए पशु बांधनेके खूंटे (मेढ) के नाम २-मेधि १ खलेदारु २ ॥

आशुर्व्रीहिः पाटलः स्या-

सट्ठी (धान) क नाम ३-आशु १ व्रीहि २ पाटल ३ ॥

-च्छितशूकयवौ समौ ॥ १५ ॥

जौके नाम २-शितशूक १ यव २ ॥ १५ ॥

तोक्मस्तु तत्र हरिते-

हरे जौका नाम १-तोक्म १ ॥

-कलायस्तु सतीनकः । हरेणुखण्डिकौ चास्मिन्-

मटरके नाम ४-कलाय १ सतीनक २ हरेणु ३ खण्डिक ४ ॥

-कोरदूषस्तु कोद्रवः ॥ १६ ॥

कोदोंके नाम २-कोरदूष १ कोद्रव २ ॥ १६ ॥

मङ्गल्यका मसूरो-

मसूरके नाम २-मङ्गल्यक १ मसूर २ ॥

-ऽथ मकुष्ठकमयुष्ठकौ । वनमुद्गे-

मोठके नाम ३-मकुष्ठक १ मयुष्ठक २ वनमुद्ग ३ ॥

-सर्षपे तु द्वौ तंतुभकदम्बकौ१७॥

सरसोंके नाम ३-सर्षप१तन्तुभ२ कदम्बक ३ ॥१७॥

सिद्धार्थस्त्वेष धवलो-

सफेद सरसोंका नाम१-सिद्धार्थ१॥

-गोधूमः सुमनः समौ ।

गेहूँके नाम २-गोधूम१सुमन २॥

स्याद्यावकस्तु कुल्माष-

कुलथीके नाम२-यावक१कुल्माष२॥

-श्चणको हरिमन्थकः ॥१८॥

अरहरे (चने)के नाम२-चणक१ हरिमन्थक २ ॥ १८ ॥

द्वौ तिले तिलपेजश्च तिलपिञ्जश्च निष्फले ।

'फलहीन' 'बांझतिल' 'रानतिल' के नाम २-तिलपेज १ तिलपिंज२॥

क्षवः क्षुताभिजननो राजिका कृष्णिकाऽऽसुरी ॥ १९ ॥

राईके नाम ५-क्षव १ क्षुताभिजनन २ राजिका ३ कृष्णिका४ आसुरी ५ ॥ १९ ॥

स्त्रियौ कङ्गुप्रियंगू द्वे-

कंगनीके नाम२-कंगु१प्रियंगु२॥

-अतसी स्यादुमा क्षुमा ।

अलसीके नाम ३-अतसी १ उमा २ क्षुमा ३ ॥

मातुलानी तु भङ्गायाम्-

भङ्गके नाम २-मातुलानी १ भंगा २ ॥

-व्रीहिभेदस्त्वणुः पुमान् ॥२०॥

चीना धान्यका नाम१-अणु१॥२०

किंशारुः सस्यशूकं स्यात्-

जौ इत्यादिके वीखे अग्रभाग (सीकुर) के नाम नाम२-किंशारु१ सस्यशूक २ ॥

-कणिशं सस्यमञ्जरी ।

धान्यकी बालके नाम२- कणिश१ सस्यमञ्जरी २॥

धान्यं व्रीहिः स्तम्बकरिः-

धान्यमात्रके नाम ३-धान्य १ व्रीहि २ स्तम्बकरि ३ ॥

-स्तम्बो गुच्छस्तृणादिनः॥२१॥

यव आदिकी जडके नाम२-स्तम्ब १ गुच्छ २॥२१ ॥

नाडी नालं च काण्डोऽस्य-

नलुआके नाम२-नाडी १नाल२॥

-पलालोऽस्त्री स निष्फलः ।

प्यालका नाम १-पलाल १ ॥

कडङ्गरो बुसं क्लीबे-

मोटे भुसके नाम २-कडङ्गर १ बुस २ ॥

-धान्यत्वचि तुषः पुमान्॥२२॥

भूसीका नाम १-तुष १ ॥२२॥

शूकोऽस्त्री श्लक्ष्णतीक्ष्णाग्रे-

यव आदिके चिकने और तीखे अग्रभागके नाम २-शूक १ श्लक्ष्ण-तीक्ष्णाग्र २ ॥

-शमी शिम्बा-

मटर आदिकी फलीके नाम २-शमी १ शिम्बा २ ॥

-त्रिषूत्तरे ।

आगे कहे हुए सब शब्द तीनों लिंगोंमें होंगे ॥

-ऋद्धमावसितं धान्यं

तृण दूर करके पैरेमें इकट्ठे करने योग्य धान्यके नाम २-ऋद्ध१ आवसित २॥

-पूतं तु बहुलीकृतम् ॥ २३ ॥

साफ करके इकट्ठे किये हुए धान्यके नाम २-पूत १ बहुलीकृत २॥२३॥

माषादयः शमीधान्ये-

फलीके भीतर होनेवाले धान्य माष आदि हैं ॥

-शूकधान्ये यवादयः ।

यव आदि शूक धान्य अर्थात् बालसे पैदा होनेवाले हैं ॥

शालयः कलमाद्याश्च षष्टिकाद्याश्च-

यव आदि और शाठी आदि शालि धान्य कहलाते है ॥

-पुंस्यमी ॥ २४ ॥

माष आदि शब्द पुँल्लिङ्गमें होते हैं ॥ २४ ॥

तृणधान्यानि नीवाराः-

पशाई आदि मुनियोंके धान्यका नाम १-नीवार १॥

स्त्री गवेधुर्गवेधुका ।

जिसको कोकणदेशमें कसाड कना कहते हैं उस मुनिअन्नके नाम २-गवेधु १ गवेधुका २ ॥

अयोग्रं मुसलोऽस्त्री स्या-

मूसलके नाम २-अयोग्र १ मुसल २ ॥

-दुदूखलमुलूखलम् ॥ २५ ॥

ओखलीके नाम २-उदूखल १ उलूखल ॥ २५ ॥

प्रस्फोटनं शूर्पमस्त्री-

छाजके नाम २-प्रस्फोटन १शूर्प २॥

-चालनी तितउः पुमान् ।

चालनीके नाम २-चालनी १ तितउ २ ॥

स्यूतप्रसेवौ-

वस्त्र सण आदिसे बने हुए थैलेके नाम २-स्यूत १ प्रसेव २ ॥

-कण्डोल पिटौ-

टोकरीके नाम २-कण्डोल१ पिट२॥

—कटाकिलिञ्जकौ ॥ २६ ॥
चटाईके नाम २—कट १ किलिंजक २ ॥ २६ ॥
समानौ—
यह समानलिंग हैं ॥
—रसवत्यां तु पाकस्थानमहानसे ।
रसोईके स्थानके नाम ३—रसवती १ पाकस्थान २ महानस ३ ॥
पौरोगवस्तदध्यक्षः—
रसोईके अधिकारीके नाम २-पौरोगव १ तदध्यक्ष (महानसाध्यक्ष) २॥
—सूपकारास्तु बल्लवाः ॥ २७॥
आरालिका आन्धसिकाः सूदा औदनिका गुणाः ।
रसोइयेके नाम ७—सूपकार १ बल्लव २ ॥२७ ॥ आरालिक ३ आन्धसिक ४ सूद ५ औदनिक ६ गुण ७ ॥
आपूपिकः कान्दविको भक्ष्यकार इमे त्रिषु ॥ २८ ॥
पुआ आदि बनानेवालेके नाम ३—आपूपिक १ कान्दविक २ भक्ष्यकार ३॥ ये शब्द तीनों लिंगोंमें होते हैं॥२८॥
अश्मन्तमुद्धानमधिश्रयणी-चुल्लिरन्तिका ।
चूल्हके नाम ५—अश्मन्त १ उद्धान २ अधिश्रयणी ३ चुल्लि ४ अन्तिका ५॥

अंगारधानिकाऽङ्गारशकट्यपि हसन्त्यपि ॥ २९ ॥ हसन्य—
बरोसी (सिगडीके) नाम ४—अंगारधानिका १ अंगारशकटी २ हसन्ती ३ ॥२९॥ हसनी ४ ॥
—प्यथ न स्त्री स्यादंगारो—
अंगारेका नाम १—अंगार १ ॥
—ऽलातमुल्मुकम् ।
जलते हुए काष्ठके नाम२—अलात १ उल्मुक २ ॥
क्लीबेऽम्बरीषं भ्राष्ट्रो—
भाडके नाम२—अम्बरीष १ भ्राष्ट्र२॥
—ना कन्दुर्वा स्वेदनी स्त्रियाम् ॥ ३० ॥
कढाईके नाम २—कन्दु १ स्वेदनी २ ॥ ३० ॥
अलिञ्जरः स्यान्माणिकः—
माठ (बडा घडा) के नाम २—अलिञ्जर १ मणिक २ ॥
—कर्कर्यालुर्गलन्तिका ।
कठौतीके नाम ३—कर्करी १ आलु २ गलन्तिका ३ ॥
पिठरः स्थाल्युखा कुण्डं—
बटलोईके नाम ४—पिठर १ स्थाली २ उखा ३ कुण्ड ४ ॥
—कलशस्तु त्रिषु द्वयोः ॥ ३१॥

घटः कुटनिपा–

घडेके नाम ४–कलश १ ॥ ॥ ३१ ॥ घट २ कुट ३ निप ४ ॥

–वर्ध्री शरावो वर्धमानकः ।

सरवेके नाम २–शराव १ वर्धमानक २ ॥

ऋजीषं पिष्टपचनं–

तवेके नाम २–ऋजीष १ पिष्टपचन २ ॥

–कंसोऽस्त्री पानभाजनम् ॥ ३२ ॥

कटोरीके नाम २–कंस १ पानभाजन २ ॥ ३२ ॥

कुतूः कृत्तेः स्नेहपात्रं–

कुप्पेका नाम १–कुतू १ ॥

–सैवाल्पा कुतुपः पुमान् ।

कुपीका नाम १–कुतुप १ ॥

सर्वमावपनं भाण्ड पात्रामत्रं च भाजनम् ॥ ३३ ॥

वरतनके नाम ५–आवपन १ भाण्ड २ पात्र ३ अमत्र ४ भाजन ५ ॥ ३३ ॥

दर्विः कम्बिः खजाका च–

कछैलीके नाम ३–दर्वि १ कम्बि २ खजाका ३ ॥

–स्यात्तर्दूर्दारुहस्तकः ।

डोईके नाम २–तर्दू १ दारुहस्तक २ ॥

अस्त्री शाकं हरितकं शिग्रु–

शाकके नाम ३–शाक १ हरितक २ शिग्रु ३ ॥

–रस्य तु नाडिका ॥ ३४ ॥

कलम्बश्च कडम्बश्च–

शाककी डंडीके नाम ३–नाडिका १ ॥ ३४ ॥ कलम्ब २ कडम्ब ३ ॥

–वेसवार उपस्करः ।

मसालेके नाम २–वेसवार १ उपस्कर २ ॥

तिन्तिडीकं च चुक्रं च वृक्षाम्ल–

चूख (अमचूरआदि) के नाम ३– तिंतिडीक १ चुक्र २ वृक्षाम्ल ३ ॥

- मथ वेल्लजम् ॥ ३५ ॥

मरीचं कोलकं कृष्णमूषणं धर्मपत्तनम् ।

मिर्चके नाम ६–वेल्लज १ ॥ ३५ ॥ मरीच २ कोलक ३ कृष्ण ४ ऊषण ५ धर्मपत्तन ६ ॥

जीरको जरणोऽजाजी कणा–

जीरेके नाम ४–जीरक १ जरण २ अजाजी ३ कणा ४ ॥

–कृष्णे तु जीरके ॥ ३६ ॥

सुषवी कारवी पृथ्वी पृथुः– कालोपकुञ्चिका ।

कालेजीरेके नाम ६–॥ ३६ ॥ सुषवी

कारवी २ पृथ्वी ३ पृथु ४ काला ५ उपकुञ्चिका ६ ॥

आर्द्रकं शृङ्गबेरं स्या-

अदरखके नाम २—आर्द्रक १ शृङ्गबेर २ ॥

-द्थ च्छत्रा वितुन्नकम्॥ ३७॥ कुस्तुम्बुरु च धान्याक-

धनियेके नाम ४—छत्रा १ वितुन्नक २ ॥ ३७ ॥ कुस्तुम्बुरु ३ धान्याक ४॥

-मथ शुण्ठी महौषधम् । स्त्रीनपुंसकयोर्विश्वं नागरं विश्वभेषजम् ॥ ३८॥

सोंठके नाम ५—शुण्ठी १ महौषध २ विश्व ३ नागर ४ विश्वभेषज ५॥ ३८॥

आरनालकसौवीरकुल्माषाभिषुतानि च । अवन्तिसोमधान्याम्लकुञ्जलानि च काञ्जिके ॥ ३९॥

कांजीके नाम ७— आरनालक १ सौवीर २ कुल्माषाभिषुत ३ अवन्तिसोम ४ धान्याम्ल ५ कुञ्जल ६ कांजिक ७ ॥ ३९ ॥

सहस्रवेधि जतुकं बाह्लीकं हिंगु रामठम् ।

हींगके नाम ५—सहस्रवेधिन् १ जतुक २ बाह्लीक ३ हिंगु ४ रामठ ५ ॥

तत्पत्री कारवी पृथ्वी बाष्पिका कबरी पृथुः ॥ ४० ॥

हींगके वृक्षके पत्तक नाम ५—कारवी १ पृथ्वी २ बाष्पिका ३ कबरी ४ पृथु ५ ॥ ४० ॥

निशाख्या काञ्चनी पीता हरिद्रा वरवर्णिनी ।

हलदीके नाम ५—निशा १ कांचनी २ पीता ३ हरिद्रा ४ वरवर्णिनी ५॥

सामुद्रं यत्तु लवणमक्षीवं वशिरं च तत् ॥ ४१ ॥

समुद्रझागके नाम २—अक्षीव १ वशिर २ ॥ ४१ ॥

सैन्धवोऽस्त्री शीतशिवं माणिमन्थश्च सिन्धुजे ।

सैंधेके नाम ४—सैन्धव १ शीतशिव २ माणिमन्थ ३ सिन्धुज ४ ॥

रौमकं वसुकं-

सामरके नाम २—रौमक १ वसुक २॥

-पाक्यं बिडं च कृतके द्वयम्॥ ४२॥

खारीके नाम २—पाक्य १ बिड २ ॥ ४२ ॥

सौवर्चलेऽक्षरुचके-

संचलखारके नाम ३—सौवर्चल १ अक्ष २ रुचक ३ ॥

-तिलकं तत्र मेचके ।

काले संचलखारके नाम २—तिलक १ मेचक २ ॥

मत्स्यण्डी फाणितं खण्डविकारे-

राबके नाम २—मत्स्यंडी १ फाणित २ ॥

—शर्करा सिता ॥ ४३ ॥

मिश्रीके नाम २—शर्करा १ सिता २ ॥४३॥

कूर्चिका क्षीरविकृतिः स्या—

मावेके नाम२—कूर्चिका १ क्षीरविकृति २ ॥

—द्रसाला तु मार्जिता ।

श्रीखण्डके नाम २—रसाला १ मार्जिता २ ॥

स्यात्तेमन तु निष्ठानं—

कढीके नाम २—तेमन१ निष्ठान२॥

—त्रिलिङ्गावासितावधेः ॥ ४४॥

वासितपर्यन्त शब्द तीनों लिंगोंमें होते हैं ॥ ४४ ॥

शूलाकृतं भटित्रं च शूल्य—

लोहशलाकासे पकाये हुए मांसके नाम३-शूलाकृत१भटित्र२शूल्य३॥

—मुख्यं तु पैठरम् ।

बटलोईमें पकाये हुए अन्नादिके नाम २—उख्य १ पैठर २ ॥

प्रणीतमुपसंपन्नं—

पकी हुई रसोईके नाम २—प्रणीत १ उपसम्पन्न २॥

—प्रयस्तं स्यात्सुसंस्कृतम्॥४५॥

घृत तैलादिसे बनी हुई रसोईके नाम२—प्रयस्त१ सुसंस्कृत २ ॥४५॥

स्यात्पिच्छिलं तु विजिलं—

पनीले भोजनके नाम२-पिच्छिल१ विजिल २ ॥

संमृष्टं शोधितं समे ।

बीने हुए अन्नके नाम २—सम्मृष्ट १ शोधित २ ॥

चिक्कणं मसृणं स्निग्धं—

चिकनेके नाम ३—चिक्कण १ मसृण २ स्निग्ध ३ ॥

तुल्ये भावितवासिते ॥ ४६ ॥

छौंकी हुई वस्तुके नाम२—भावित १ वासित २ ॥ ४६ ॥

आपक्वं पौलिरभ्यूषो—

घृत आदिमें भुनी हुई वस्तुके नाम ३—आपक्व १ पौलि २ अभ्यूष ३ ॥

लाजाः पुंभूम्नि चाक्षताः ।

खीलोंका नाम १—लाज १ ॥

पृथुकः स्याच्चिपिटको—

परमलके नाम २—पृथुक१चिपिटक २ ॥

धाना भृष्टयवे स्त्रियः ॥ ४७ ॥

भुने हुए जौके नाम २—धाना १ भृष्टयव २ ॥ ४७ ॥

पूपो-ऽपूपः पिष्टकः स्यात्—

पुएके नाम ३—पूप१अपूप२पिष्टक३॥

—करम्भो दधिसक्तवः ।

दधियुक्त सत्तुओंके नाम २—करम्भ १ दधिसक्तु २ ॥

भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री सदीदिविः ॥ ४८ ॥

भातके नाम ६—भिस्सा १ भक्त २ अन्धस् ३ अन्न ४ ओदन ५ दीदिवि ६ ॥ ४८ ॥

भिस्सटा दग्धिका—

जले अन्नके नाम २—भिस्सटा १ दग्धिका २ ॥

—सर्वरसाग्रे मण्डमस्त्रियाम् ।

मांडका नाम १—मण्ड १ ॥

मासराचामनिस्रावा मण्डे भक्तसमुद्भवे ॥ ४९ ॥

केवल भातके माडके नाम ३—मासर १ आचाम २ निस्राव ३ ॥४९॥

यवागूरुष्णिका श्राणा विलेपी तरला च सा ।

पतले भातक नाम ५—यवागू १ उष्णिका २ श्राणा ३ विलेपी ४ तरला ५॥

गव्यं त्रिषु गवां सर्वं—

गायसे उत्पन्न वस्तुका नाम १—गव्य १

—गोविट् गोमयमस्त्रियाम् ॥५०॥

गौके गोबरके नाम २—गोविश् १ गोमय २ ॥ ५० ॥

तत्तु शुष्कं करीषोऽस्त्री—

सूखे हुए गोबरका नाम १—करीष १॥

—दुग्धं क्षीरं पयः समम् ।

दूधके नाम ३—दुग्ध १ क्षीर २ पयस् ३ ॥

पयस्यमाज्यदध्यादि—

घृत दही आदिका नाम १—पयस्य १॥

—द्रप्सं दधि घनेतरत् ॥ ५१ ॥

पतले दहीका नाम १—द्रप्स १॥५१॥

घृतमाज्यं हविः सर्पि—

घीके नाम ४—घृत १ आज्य २ हविष् ३ सर्पिष् ४ ॥

—र्नवनीतं नवोद्धृतम् ।

मक्खनके नाम २—नवनीत १ नवोद्धृत २ ॥

तत्तु हैयङ्गवीनं यद्ध्योगोदोहोद्भवं घृतम् ॥ ५२ ॥

नौनीघीका नाम १—हैयङ्गवीन १ ॥ ५२ ॥

दण्डाहतं कालशेयमरिष्टमपि गोरसः ।

मट्ठेके नाम ४—दण्डाहत १ कालशेय २ अरिष्ट ३ गोरस ४ ॥

तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम् ॥ ५३ ॥

मट्ठेके भद ३—तक्र १ उदश्वित २ मथित ३ ॥ ५३ ॥

मण्डं दधिभवं मस्तु—

दहीके पानीका नाम १–मस्तु १ ॥
–पीयूषोऽभिनवं पयः ।
खीसका नाम १–पीयूष १ ॥
अशनाया बुभुक्षा क्षुद्–
भूखके नाम ३–अशनाया १ बुभुक्षा २ क्षुध् ३ ॥
–ग्रासस्तु कवलः पुमान् ॥५४॥
ग्रासके नाम २–ग्रास १ कवल २ ॥ ५४ ॥
सपीतिः स्त्री तुल्यपानं–
साथ पीनेके नाम २–सपीति १ तुल्यपान २ ॥
–सग्धिः स्त्री सहभोजनम् ।
एकसाथ भोजन करनेके नाम २–सग्धि १ सहभोजन २ ॥
उदन्या तु पिपासा तृट् तर्षो–
प्यासके नाम ४–उदन्या १ पिपासा २ तृष् ३ तर्ष ४ ॥
–जग्धिस्तु भोजनम् ॥ ५५ ॥
जेमनं लेह आहारो निघासो न्याद इत्यपि ॥
भोजनके नाम ७–जग्धि १ भोजन २ ॥ ५५ ॥ जेमन ३ लेह ४ आहार ५ निघास ६ न्याद ७ ॥
सौहित्यं तर्पणं तृप्तिः–
तृप्तिके नाम ३–सौहित्य १ तर्पण २ तृप्ति ३

–फेला भुक्तसमुज्झितम् ॥५६॥
भोजन करके त्यागी हुई वस्तुका नाम १–फेला १ ॥ ५६ ॥
कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् ।
इच्छाके नाम ६–काम १ प्रकाम २ पर्याप्त ३ निकाम ४ इष्ट ५ यथेप्सित ६ ॥
गोप गोपालगोसंख्यगोधुगाभीरवल्लवाः ॥ ५७ ॥
